कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
अष्टमाष्टक	निलकंठ	धर्मशास्त्र	अपूर्ण		२/१	१२	संस्कृत देवनागरी	~~संस्कृत~~ ~~पेपर~~ कागद	09	32		

M- 3063

M-3063

अथ अष्टमाष्टकप्रारंभः॥

॥सं०अ०॥
॥१॥

श्रीगणेशायनमः॥ हरिः ॐ ३म्॥ प्रहोताजातोमहान्नभोविन्नृषद्वासीदद्दपामुपस्थे॥ दधि
र्योधायिसतेवयांसियंतावसूनिविधतेतनूपाः॥ इमंविधंतोअपांसधस्थेपसुंननष्टंपदैर
नुग्मन्॥ गुहाचतंतमुशिजोनमोभिरिछंतोधीराभृगवोविंदन्॥ इमंत्रितोभूर्यविंदद्दिछ
न्वैभूवसोमूर्धन्यघ्न्यायाः॥ सशेवृधोजातआहर्म्येषुनाभिर्युवाभवतिरोचनस्य॥ मंद्रंहो
तारमुशिजोनमोभिः प्रांचंयज्ञंनेतारमध्वराणां॥ विशामकृण्वन्नरतिंपावकंहव्यवाहंद
धतोमानुषेषु॥ प्रभूर्जयंतंमहांविपोधांमूराअमूरंपुरांदर्माणं॥ नयंतोगर्भंवनांधियं
धुर्हिरिश्मश्रुंनार्वाणंधनर्चम् २ निपस्त्यासुत्रितःस्तभूयन्परिवीतोयोनौसीदद्दंतः॥
अतस्संगृभ्याविशांदमूनाविधर्मणायंत्रैरीयतेन्नॄन्॥ अस्याजरासोदमामरित्राअर्चद्धू
मासोअग्नयः पावकाः॥ श्वितीचयःश्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः॥ प्रजि

॥राम०॥
॥१॥

द्ध्याभरतेवेपोअग्निः प्रवयुनानिचेतसापृथिव्याः॥ तमायवःशुचयंतंपावकंमंद्रंहो
तारंदधिरेयजिष्ठं॥ द्यावायमग्निंपृथिवीजनिष्टामापस्त्वष्टाभृगवोयंसहोभिः॥ ईळेन्यं
प्रथमंमातरिश्वादेवास्ततक्षुर्मनवेयजत्रं॥ यंत्वादेवादधिरेहव्यवाहंपुरुस्पृहोमानुषा
सोयजत्रं॥ सयामन्नग्नेस्तुवतेवयोधाः प्रदेवयन्यशसःसंहिपूर्वीः॥२॥ जगृभ्मा
तेदक्षिणमिंद्रहस्तंवसूयवोवसुपतेवसूनां॥ विद्माहित्वागोपतिंशूरगोनामस्मभ्यंचित्रंवृ
षणंरयिंदाः॥ स्वायुधंस्ववसंसुनीथंचतुस्समुद्रंधरुणंरयीणां॥ चर्कृत्यंशंस्यंभूरिवार
मस्मभ्यं०॥ सुब्रह्माणंदेववंतंबृहंतमुरुंगभीरंपृथुबुध्नमिंद्र॥ श्रुतऋषिमुग्रमभिमा
तिषाहम०॥ सनद्वाजंविप्रवीरंतरुत्रंधनस्पृतंशूशुवांसंसुदक्षं॥ दस्युहनंपूर्भिदमिंद्रस
त्यम०॥ अश्वावंतंरथिनंवीरवंतंसहस्रिणंशतिनंवाजमिंद्र॥ भद्रव्रातंविप्रवीरंस्वर्षा

सं·अ०
२

मु०॥३॥ प्रसप्तगुमृतधीतिंसुमेधांबृहस्पतिंमतिरच्छाजिगाति॥ यऽआंगिरसोनमसोपस
द्योस्मभ्यं०॥ वनीवानोममदूतासइंद्रंस्तोमाश्चरंतिसुमतीरियानाः॥ हृदिस्पृशोमनसावच्य
मानाऽअस्मभ्यं०॥ यत्वायामिदद्धितन्नइंद्रबृहंतंक्षयमसमंजनानां॥ अभितद्यावापृथिवी
गृणीतामस्मभ्यं०॥४॥ अहंभुवंवसुनः पूर्व्यस्पतिरहंधनानिसंजयामिशश्वतः॥ मांहवंते
पितरंनजंतवोहंदाशुषेविभजामिभोजनं॥ अहमिंद्रोरोधोवक्षोअथर्वणस्त्रितायगाअ
जनयमहेरधि॥ अहंदस्युभ्यः परिनृम्णमाददेगोत्राशिक्षन्दधीचेमातरिश्वने॥ मह्यंत्वष्टा
वज्रमतक्षदायसंमयिदेवासोवृजन्नपिक्रतुं॥ ममानीकंसूर्यस्येवदुष्टरंमामार्यंतिकृते
नकर्त्वेनच॥ अहमेतंगव्ययमश्व्यंपशुंपुरीषिणंसायकेनाहिरण्ययं॥ पुरूसहस्रा
निशिशामिदाशुषेयन्मासोमासउक्थिनोअमंदिषुः॥ अहमिंद्रोनपराजिग्यऽइद्ध

रम०
२

न्नं न मृत्यवेव तस्थे कदाचन॥ सोममिन्मा सुन्वंतो याचता वसु न मे पूरवस्सख्ये रिषाथन॥५॥
अहमेतान्छाश्वसतो द्वाद्वेंद्रं ये वज्रं युधयेऽकृण्वत॥ आह्वयमानाँ अव हन्मनाहनं दृळ्हा वद
न्ननमस्युर्नमस्विनः॥ अभी३दमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करंति॥ खले न
पर्षान्प्रति हन्मि भूरि किं मा निंदंति शत्रवोऽनिंद्राः॥ अहं गुंगुभ्यो अतिथिग्वमिष्करमिषं न वृ
त्रतुरं विक्षु धारयं॥ यत्पर्णयघ्न ऽ उत वा करंजहे प्राहं महे वृत्रहत्ये अशुश्रवि॥ प्र मे नमी
साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत द्विता॥ दिद्युं यदस्य समिथेषु मंहयमादिदेनं
शंस्यमुक्थ्यं करं॥ प्र नेमस्मिन्ददृशे सोमो अंतर्गोपा नेममाविरस्था कृणोति॥ स तिग्मशृं
गं वृषभं युयुत्सन्द्रुहस्तस्थौ बहुले बद्धो ऽ अंतः॥ आदित्यानां वसूनां रुद्रियाणां देवो देवानां
न मिनामि धाम॥ ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हं॥६॥ अहं दां गृण

सं॰अ॰
३

तेपूर्व्यंवस्वहंब्रह्मकृणवंमह्यंवर्धनं॥ अहंभुवंयजमानस्यचोदितायज्वनःसाक्षिविश्वस्मि
न्भरे॥ मांधुरिंद्रंनामदेवताद्दिवश्चग्मश्चापांचजंतवः॥ अहंहरीवृषणाविव्रतारघूअहं
वज्रंशवसेधृष्ण्वाददे॥ अहमत्कंकवयेशिश्नथंहथैरहंकुत्समावमाभिरूतिभिः॥ अहं
शुष्णस्यश्नथितावधर्यमंनयोररआर्यंनामदस्यवे॥ अहंपितेववेतसूंरभिष्टयेतुग्रंकु
त्सायस्मदिभंचरंधयं॥ अहंभुवंयजमानस्यराजनिप्रयद्भरेतुजयेनप्रियाधृषे॥ अहं
रंधयंमृगयंश्रुतर्वणेयन्माजिहीतवयुनाचनानुषक्॥ अहंवेशंनम्रमायवेकरमहंस
व्यायपड्गृभिमरंधयं॥७॥ अहंसयोनववास्त्वंबृहद्रथंसंवृत्रेवदासंवृत्रहारुजं॥ यद्वर्ध
यंतंप्रथयंतमानुषग्दूरेपारेरजसोरोचनाकरं॥ अहंसूर्यस्यपरियाम्याशुभिः प्रैतशे
भिर्वहमानओजसा॥ यन्मासावोमनुषआहनिर्णिजऋधक्कृषेदासंकृत्व्यंहथैः॥

राम॰
३

अहंसप्तहानहुषोनहुष्टरᳶ प्राश्रावयंशवसातुर्वशंयदुं॥ अहंन्य१न्यंसहसासहस्करं
नवव्राधतोनवतिंचवक्षयं॥ अहंसप्तस्रवतोधारयंवृषाद्रवित्न्वᳶ पृथिव्यांसीराअधि॥
अहमर्णांसिवितिरामिसुक्रतुर्युधाविदंमनवेगातुमिष्टये॥ अहंतदासुधारयंयदासुनदे
वश्चनत्वष्टाधारयद्रुशत्॥ स्पार्हंगवामूधस्सुवक्षणास्वामधोर्मधुश्वात्र्यंसोममाशिरं
॥ एवादेवाँइंद्रोविव्येनॄन्प्रच्यौत्नेनमघवासत्यराधाः॥ विश्वेत्तातेहरिवश्शचीवोभितुरा
सस्स्वयशसोगृणंति।च॥ प्रवोमहेमंदमानायांधसोर्चाविश्वानरायविश्वाभुवे॥ इंद्रस्य
यस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः॥ सोचिन्नुसख्यानर्यइनःस्तुतश्च
र्कृत्यइंद्रोमावतेनरे॥ विश्वासुधूर्षुवाजकृत्येषुसत्पतेवृत्रेवाप्स्व१भिशूरमंदसे॥ केतेन
रइंद्रयेतइषेयेतेसुम्नंसधन्य१मियक्षान्॥ केतेवाजायासुर्यायहिन्विरेकेअप्सुस्वासु

सं॰अ॰
४

र्वरासु पौँस्ये॥ भुवस्त्वमिंद्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः॥ भुवो नृँश्च्यौत्नो
विश्वस्मिन्भरे ज्येष्ठश्च मंत्रो विश्वचर्षणे॥ अवा नु कंज्यायान्यज्ञवनसो महींत ऽओमात्रां
कृष्टयो विदुः॥ असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा कृषे॥ एता विश्वा सवना
तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे॥ वराय ते पात्रं धर्मणे तना यज्ञो मंत्रो ब्रह्मोद्य
तं वचः॥ ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने॥ प्र ते सुम्नस्य मनसा पथा
भुवन्मदे सुतस्य सोम्यस्यांधसः॥ ७॥ महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशि
थापः॥ विश्वा ऽअपश्यद्बहुधा ते ऽअग्ने जातवेदस्तन्वो देव एकः॥ को मा ददर्श कतमस्स दे
वो यो मे तन्वो बहुधा पर्यपश्यत्॥ क्वाह मित्रावरुणा क्षियंत्यग्नेर्विश्वाः समिधो देवयानीः
॥ ऐछाम त्वा बहुधा जातवेदः प्रविष्टमग्ने ऽअप्स्वोषधीषु॥ तं त्वा यमो ऽअचिकेच्चित्रभा

रम
४

नोदशांतरुष्यादतिरोचमानं॥ होत्रादहंवरुणबिभ्यदायंनेदेवमायुनजन्नत्रदेवाः॥ तस्य
मेतन्वोबहुधानिविष्टाएतमर्थंनचिकेताहमग्निः॥ एहिमनुर्देवयुर्यज्ञकामोरंकृत्या
तमसिक्षेष्यग्ने॥ सुगान्पथᳵकृणुहिदेवयानान्वहहव्यानिसुमनस्यमानः॥१०॥ अ
ग्नेᳵपूर्वेभ्रातरोअर्थमेतंरथीवाध्वानमन्वावरीवुः॥ तस्माद्भियावरुणदूरमायंगौरोन
क्षेप्नोरविजेज्यायाः॥ कुर्म्मस्तऽआयुरजरंयदग्नेयथायुक्तोजातवेदोनरिष्याः॥ अथा
वहासिसुमनस्यमानोभागंदेवेभ्योहविषस्सुजात॥ प्रयाजान्मेअनुयाजांश्चकेवलान्
ऊर्जस्वंतंहविषोदत्तभागं॥ घृतंचापांपुरुषंचौषधीनामग्नेश्चदीर्घमायुरस्तुदेवाः॥ तव
प्रयाजाऽ~~अनुयाजाऽ~~अनुयाजाश्चकेवलऽऊर्जस्वंतोहविषस्संतुभागाः॥ तवाग्नेयज्ञो
ऽयमस्तुसर्वस्तुभ्यंनमंतांप्रदिशश्चतस्रः॥११॥ विश्वेदेवाश्शास्तनमायथेहहोतावृ

तो मनवै यन्निषद्य ॥ प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥ अहं होता न्यसी
दं यजीयान्विश्वे देवा मरुतो मा जुनंति ॥ अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुति
र्वां ॥ अयं यो होता किरु स यमस्य कमप्यूहे यत्समंजंति देवाः ॥ अहरहर्जायते मासिमास्यथा
देवा दधिरे हव्यवाहं ॥ मां देवा दधिरे हव्यवाहमपम्लुक्तं बहुकृच्छ्रा चरंतं ॥ अग्निर्विद्वान्यज्ञं न
ः कल्पयाति पंचयामं त्रिवृतं सप्ततंतुं ॥ आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः करा
णि ॥ आ बाह्वोर्वज्रमिंद्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥ त्रीणि शता त्री सहस्राण्य
ग्निं त्रिंशच्च देवा नव चासपर्यन् ॥ औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसाद
यंत ॥ १२ ॥ यमैच्छाम मनसा सोऽयमागाद्यज्ञस्य विद्वान्परुषश्चिकित्वान् ॥ स नो यक्षद्दे
वताता यजीयान्नि हि षत्सदंतरः पूर्वो अस्मत् ॥ अराधि होता निषदा यजीयानभि प्रयां

सिसुधितानिहिख्यत्॥ यजामहैयज्ञियान्हंतदेवाँऽ ईळामहाऽ ईड्याँऽ आज्येन॥ सा
ध्वीमकर्देववीतिंनोअद्ययज्ञस्यजिह्वामविदामगुह्यां॥ सआयुरागात्सुरभिर्वसानोभद्रा
मकर्देवहूतिंनोअद्य॥ तदद्यवाचᳶप्रथमंमसीययेनासुराँऽ अभिदेवाऽ असाम॥ ऊर्जादउ
तयज्ञियासᳶ पंचजनाममहोत्रंजुषध्वं॥ पंचजनाममहोत्रंजुषंतांगोजाताऽ उतये
यज्ञियासः॥ पृथिवीनᳶ पार्थिवात्पात्वंहसोंतरिक्षंदिव्यात्पात्वस्मान्॥ २३॥ तंतुंतन्वन्रज
सोभानुमन्विहिज्योतिष्मतᳶ पथोरक्षधियाकृतान्॥ अनुल्बणंवयतजोगुवामपोमनुर्भ
वजनयादैव्यंजनं॥ अक्षानहोनह्यतनोतसोम्याऽ इष्कृणुध्वंरशनाऽ ओतपिंशत॥ अष्टा
वंधुरंवहताभितोरथंयेनदेवासोऽ अनयन्नभिप्रियं॥ अश्मन्वतीरीयतेसंरभध्वमुत्तिष्ठ
तप्रतरतासखायः॥ अत्राजहामयेअसन्नशेवाश्शिवान्वयमुत्तरेमाभिवाजान्॥ व

५२

सं॰ अ॰
६

ष्टामायावेदपसामपस्तमो बिभ्रत्पात्रादेवपानानिशंतमा॥ शिशीतेन्नूनंपरशुंस्वायसंयेनवृ
श्चादेतशोब्रह्मणस्पतिः॥ सतोन्नूनंकवयस्संशिशीतवाशीभिर्याभिरमृतायतक्षथ॥ विद्वां
सः पदागुह्यानिकर्त्तनयेनदेवासोऽअमृतत्वमानशुः॥ गर्भेयोषामदधुर्वत्समासन्यपीच्ये
नमनसोतजिह्वया॥ सविश्वाहासुमनायोग्याऽअभिसिषासनिर्वनतेकारइज्जितिं॥१४
॥तांसुतेकीर्त्तिंमघवन्महित्वायत्वाभीतेरोदसीऽअह्वयेतां॥ प्रावोदेवाँऽआतिरोदासमोज
ः प्रजायैत्वस्यैयदशिक्षइंद्र॥ यदचरस्तन्वावावृधानोबलानींद्रप्रब्रुवाणोजनेषु॥ माये
त्सातेयानियुद्धान्याहुर्नाद्यशत्रुंननुपुराविवित्से॥ कऽउनुतेमहिमनस्समस्यास्मत्पूर्वऋ
षयोंतमापुः॥ यन्मातरंचपितरंचसाकमजनयथास्तन्व१ःस्वायाः॥ चत्वारितेऽअसुर्या
णिनामादाभ्यानिमहिषस्यसंति॥ त्वमंगतानिविश्वानिवित्सेयेभिःकर्म्माणिमघवं

श

राम
६

चकर्थ॥ त्वंविश्वादधिषेकेवलानियान्याविर्याचगुहावसूनि॥ काममिन्मेमघवन्माविताॅरीस्त्वमा
ज्ञातात्वमिंद्रासिदाता॥ योऽअदधाज्ज्योतिषिज्योतिरंतर्योऽअसृजन्मधुनासंमधूनि॥ अधप्रि
यंशूषमिंद्रायमन्मब्रह्मकृतोबृहदुक्थादवाचि॥ २५॥ दूरेतन्नामगुह्यंपराचैर्यत्त्वाभीतेऽअ
ह्वयेतांवयोधै॥ उदस्तभ्नाᳶपृथिवींद्यामभीकेभ्रातुᳶपुत्रान्मघवन्तित्विषाणः॥ महत्तन्नाम
गुह्यंपुरुस्पृग्येनभूतंजनयोयेनभव्यं॥ प्रत्नंजातंज्योतिर्यदस्यप्रियंप्रियास्समविशंतपं
च॥ आरोदसीऽअपृणादोतमध्यंपंचदेवाँऽ ऋतुशस्सप्तसप्त॥ चतुस्त्रिंशतापुरुधा
विचष्टेसरूपेणज्योतिषाविव्रतेन॥ यदुषऽऔच्छᳶप्रथमाविभानामजनयोयेनपुष्टस्य
पुष्टं॥ यत्तेजामित्वमवरंपरस्यामहन्महत्याऽअसुरत्वमेकं॥ विधुंदद्राणंसमनेबहूनांयु
वानंसंतंपलितोजगार॥ देवस्यपश्यकाव्यंमहित्वाद्याममारसह्यस्समान॥ २६॥ शाक्म

सं॰अ॰
७

नाशाकोऽ अरुणस्सुपर्णऽ आयोमहश्शूरस्सनादनीळः॥ यच्चिकेतसत्यमित्तन्नमोघंव
सुस्पार्हमुतजेतोतदाता॥ ऐभिर्ददेवृष्ण्यापौंस्यानियेभिरौक्षद्वृत्रहत्यायवज्री॥ येकर्मण
ऽ क्रियमाणस्यमह्नऽ ऋतेकर्ममुदजायंतदेवाः॥ युजाकर्माणिजनयन्विश्वौजाऽ अश
स्तिहाविश्वमनास्तुराषाट्॥ पीत्वीसोमस्यदिवऽआवृधानश्शूरोनिर्युधाधमद्दस्यून्
॥१७॥ इदंतऽ एकंपरऽ ऊतऽ एकंतृतीयेनज्योतिषासंविशस्व॥ संवेशनेतन्व१श्चारुरे
धिप्रियोदेवानांपरमेजनित्रे॥ तनूष्टेवाजिन्तन्वं१नयंतीवाममस्मभ्यंधातुशर्मतुभ्यं॥
अह्रुतोमहोधरुणायदेवान्दिवीवज्योतिस्स्वमामिमीयाः॥ वाज्यसिवाजिनेनासुवेनीस्सु
वितस्स्तोमंसुवितोदिवंगाः॥ सुवितोधर्मप्रथमानुसत्यासुवितोदेवान्त्सुवितोनुपत्म॥ म
हिम्नऽ एषांपितरश्चनेशिरेदेवादेवेष्वदधुरपिक्रतुं॥ समविव्यचुरुतयान्यत्विषुरैषां

राम॰
७

तनूषुनिविविश्युᳶपुनः॥ सहोभिर्विश्वंपरिचक्रमूरजᳶपूर्वाधामान्यमितामिमानाः॥ तनू
षुविश्वाभुवनानियेमिरेप्रासारयंतपुरुधप्रजाऽअनु॥ द्विधासूनवोसुरंस्वर्विदमास्था
पयंततृतीयेनकर्मणा॥ स्वांप्रजांपितरᳶपित्र्यंसहऽआवरेष्वदधुस्तंतुमाततं॥ नावानक्षो
दᳶप्रदिशᳶपृथिव्यास्वस्तिभिरतिदुर्गाणिविश्वा॥ स्वांप्रजांबृहदुक्थोमहित्वावरेष्वदधादा
परेषु॥ १८॥ माप्रगामपथोवयंमायज्ञादिंद्रसोमिनः॥ मांतस्थुर्नोऽअरातयः॥ योयज्ञ
स्यप्रसाधनस्तंतुर्देवेष्वाततः॥ तमाहुतंनशीमहि॥ मनोन्वाहुवामहेनाराशंसेनसोमेन॥
पितॄणांचमन्मभिः॥ आतएतुमनᳶपुनःक्रत्वेदक्षायजीवसे॥ ज्योक्चसूर्यंदृशे॥ पुनर्न
ᳶपितरोमनोददातुदैव्योजनः॥ जीवंव्रातंसचेमहि॥ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः
॥ प्रजावंतस्सचेमहि॥ १९॥ यत्तेयमंवैवस्वतंमनोजगामदूरकं॥ तत्तऽआवर्त्तयामसी

सं॰अ॰
८

हृक्षयायजीवसे॥ यत्तेदिवंयत्पृथिवींमनो॰से॥ यत्तेभूमिंचतुर्भृष्टिंमनो॰से॥ यत्तेचत
स्रः प्रदिशोमनो॰से॥ यत्तेसमुद्रमर्णवंमनो॰से॥ यत्तेमरीचीः प्रवतोमनो॰से॥२०॥
यत्तेऽअपोयदोषधीर्मनो॰से॥ यत्तेसूर्यंयदुषसंमनो॰से॥ यत्तेपर्वतान्बृहतोमनो॰
से॥ यत्तेविश्वमिदंजगन्मनो॰से॥ यत्तेपराः परावतोमनो॰से॥ यत्तेभूतंचभव्यंचमनो॰
से॥२१॥ प्रतार्यायुः प्रतरंनवीयस्थातारेवक्रतुमतारथस्य॥ अधच्यवानऽउत्तवीत्य
र्थंपरातरंसुनिर्ऋतिर्जिहीतां॥ सामन्नुरायेनिधिमन्न्वन्नंकरामहेसुपुरुधश्रवांसि॥
तानोविश्वानिजरितामामत्तुपरातरं॰॥ अभीष्वर्यः पौंस्यैर्भवेमद्यौर्नभूमिंगिरयोनाज्रा
न्॥ तानोविश्वानिजरिताचिकेतपरा॰॥ मोषुणःसोममृत्यवेपरादाः पश्येमनुसूर्य
मुच्चरंतं॥ द्युभिर्हितोजरिमासूनोऽअस्तुप॰॥ असुनीतेमनोऽअस्मासुधारयजीवात

एम
८

वेसुप्रतिरानऽआयुः॥ ररंधिनस्सूर्यस्यसंदृशि घृतेनत्वंतन्वंवर्धयस्व २२॥ असुनीतेपु
नरस्मासुचक्षुः पुनः प्राणमिहनोधेहिभोगं॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळ
यानस्स्वस्ति॥ पुनर्नोऽअसुंपृथिवीददातुपुनर्द्यौर्देवीपुनरंतरिक्षं॥ पुनर्नस्सोमस्तन्वंददा
तुपुनः पूषापथ्यां३याखस्तिः॥ शंरोदसीसुबंधवेयह्वीऽऋतस्य मातरा॥ भरताम
पयद्रपोद्यौः पृथिविक्षमारपोमोषुतेकिंचनाममत्॥ अवद्वकेऽअवत्रिकादिवश्चरंतिभेष
जा॥ क्षमाचरिष्ण्वेककंभरतां॰॥ समिंद्रेरयगामनड्वाहंयऽआवहदुशीनराण्याऽअनः॥भ
रतामप॰॥२३॥ आजनंत्वेषसंदृशंमाहीनानामुपस्तुतं॥ अगन्मबिभ्रतोनमः॥ असमा
तिंनितोशनंत्वेषंनिययिनंरथं॥ भजेरथस्यसत्पतिं॥ योजनान्महिषाँऽइवातितस्थौप
वीरवान्॥ उतापवीरवान्युधा॥ यस्येक्ष्वाकुरुपव्रतेरेवान्मराय्येधते॥ दिवीवपंचकृ

सं॰अ॰
९

ष्टयः॥ इंद्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय॥ दिवीव सूर्यं दृशे॥ अगस्त्यस्य नद्भ्यः सप्ती यु
नक्षि रोहिता॥ पणीन्न्यक्रमीरभि विश्वान्राजन्नराधसः॥२५॥ अयं मातायं पिता यं जीवा
तुरागमत्॥ इदं तव प्रसर्पणं सुबंधवेहि निरिहि॥ यथा युगं वरत्रया नह्यंति धरुणाय
कं॥ एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये॥ यथेयं पृथिवी मही दाधा
रेमान्वनस्पतीन्॥ एवा दाधार०॥ यमादहं वैवस्वतात्सुबंधोर्मनऽआभरं॥ जीवातवे न
मृत्यवेऽथो०॥ न्यग्वातोऽववाति न्यक्तपति सूर्यः॥ नीचीनमघ्न्या दुहे न्यग्भवतु ते रपः॥ अ
यं मे हस्तो भगवानयं मे भगवत्तरः॥ अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः॥२६॥ऽअ
नुवाकः॥ इदमित्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्यामंतराजौ॥ क्राणा यदस्य पितरा मंह
नेष्ठाः पर्षत्पक्थेऽअहन्ना सप्त होतॄन्॥ स इद्दानाय दभ्याय वन्वंच्यवानः सूदैरमि

राम
९

मीतुवोदं॥ तूर्वयाणोगूर्त्तवचस्तमःक्षोदोनरेतऽइतऽऊतिसिंचत्॥ मनोनयेषुहवनेषु
तिग्मंविपःशच्यावनुथोद्रवंता॥ आयश्शर्याभिस्तुविनृम्णोऽअस्याश्रीणीतादिशंगभस्तौ
॥ कृष्णायद्गोष्वरुणीषुसीदद्दिवोनपाताश्विनाहुवेवां॥ वीतंमेयज्ञमागंमेऽअन्नंववन्वां
सानेषमस्मृतध्रू॥ प्रथिष्टयस्यवीरकर्ममिष्णदनुष्ठितंनुनर्योऽअपौहत्॥ पुनस्तदावृ
हतियत्कनायादुहितुराऽअनुभृतमनर्वा॥२६॥ मध्यायत्कर्त्वमभवदभीकेकामंकृण्वाने
पितरियुवत्यां॥ मनानग्रेतोजहतुर्वियंतासानौनिषिक्तंसुकृतस्ययोनौ॥ पितायत्स्वांदुहि
तरमधिष्कन्क्ष्मयारेतस्संजग्मानोनिषिंचत्॥ स्वाध्योजनयन्ब्रह्मदेवावास्तोष्पतिंव्रतपां
निरतक्षन्॥ सऽईंवृषानफेनमस्यदाजौस्मदापरैदपदभ्रचेताः॥ सरत्पदानदक्षिणापरावृ
ङ्नतानुमेपृशन्योजगृभ्रे॥ मक्षूनवह्निᳶप्रजायाऽउपब्दिरग्निंननग्नऽउपसीददूधः॥

तं २

सं॰अ॰
१०

सनितेध्मंसनितोतवाजंसधर्ताजज्ञेसहसायवीयुत्॥ मक्षूकनायास्सख्यंनवग्वाऽऋतंवदंतऽ
ऋतयुक्तिमग्मन्॥ द्विबर्हसोयऽउपगोपमागुरदक्षिणासोऽअच्युतादुदुक्षन्॥ २७॥ मक्ष
कनायास्सख्यंनवीयोराधोनरेतऽऋतमित्तुरण्यन्॥ शुचियत्तेरेक्णऽआयजंतसबर्दुघा
याःऽपयऽउस्रियायाः॥ पश्वायस्पश्वावियुतावुधंतेतिब्रवीतिवक्तरीरराणः॥ वसोर्वसुत्वा
कारवोनेहाविश्वंविवेष्टिद्रविणमुपक्षु॥ तदिन्न्वस्यपरिषद्वानोऽअग्मन्पुरुसदंतोनार्षदं
बिभित्सन्॥ विशुष्णस्यसंग्रथितमनर्वाविदत्पुरुप्रजातस्यगुहायत्॥ भर्गोहनामोतय
स्यदेवास्स्व१र्णयेत्रिषधस्थेनिषेदुः॥ अग्निर्हनामोतजातवेदाःश्रुधीनोहोतऽऋतस्यहो
ताध्रुक्॥ उतत्यामेरौद्रावर्चिमंतानासत्याविंद्रगूर्तयेयजध्यै॥ मनुष्वद्वृक्तबर्हिषेरराणामं
दूहितप्रयसाविक्षुयज्यू॥ २८॥ अयंस्तुतोराजावंदिवेधाऽअपश्चविप्रस्तरतिस्वसेतुः॥ स

एम
१०

कक्षीवंतंरेजयत्सोऽअग्निर्नेमिर्नचक्रमर्वतोरघुद्रु॥ सद्विबंधुर्वैतरणोयष्टासबर्धुंधेनुमस्वं
दुहध्यै॥ संयन्मित्रावरुणावृंजऽउक्थैर्ज्येष्ठेभिरर्यमणंवरूथैः॥ तद्बंधुस्सूरिर्दिवितेधियं
धानाभानेदिष्ठोरपतिप्रवेनन्॥ सानोनाभिᳶपरमास्यवाघाहंतत्पश्चाकतिथश्चिदास॥ इ
यंमेनाभिरिहमेसधस्थमिमेमेदेवाऽअयमस्मिसर्वः॥ द्विजाऽअहप्रथमजाऽऋतस्येदं
धेनुरदुहज्जायमाना॥ अधासुमंद्रोऽअरतिर्विभावावस्यतिद्विवर्त्तनिर्वनेषाट्॥ ऊर्ध्वा
यच्छ्रेणिर्नशिशुर्दन्मक्षूस्थिरंशेवृधंसूतमाता॥२१॥ अधागावऽउपमातिंकनायाऽअ
नुश्वांतस्यकस्यचित्परेयुः॥ श्रुधित्वंसुद्रविणोनस्त्वंयाळाश्वघ्नस्यवावृधेसूनृताभिः॥ अ
धत्वमिंद्रविद्ध्यस्मान्महोरायेनृपतेवज्रबाहुः॥ रक्षाचनोमघोनᳶपाहिसूरीननेहस
स्तेहरिवोऽअभिष्टौ॥ अधयद्राजानागविष्टौसरत्सरण्युᳵकारवेजरण्युः॥ विप्रᳶप्रेष्ठ

व्॰

स्सहेषां बभ्रूं पर एन्व वक्षद्दुतपर्वद्रेनान्॥ अधान्वस्य जेन्यस्य पुष्टौ वृथा रेभंत ऽईमहे तदू नु
॥ सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ॥ युवोर्यदि सख्यायास्मे शर्धाय स्तोमं
जुजुषे नमस्वान्॥ विश्वत्र यस्मिन्ना गिरः समीचीः॥ पूर्वीऽव गातुर्दाशत्सूनृतायै॥ स गृणा
नौ ऽ अद्रिर्देववानिति सुबंधुर्नमसा सूक्तैः॥ वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस
ऽ उस्रियायाः॥ त ऽ ऊ षु णो महो यजत्रा भूत देवास ऽ ऊतये सजोषाः॥ ये वाजां ऽ अनय
ता वियंतो ये स्था निचेतारो ऽ अमूराः॥ ३०॥ इति अष्टमाष्टके प्रथमो ध्यायः॥ १॥ हरिः॥
ऽउ७३ म॥ ये यज्ञेन दक्षिणया समक्ता ऽ इंद्रस्य सख्यममृतत्वमानश॥ तेभ्यो भद्रमंगिर
सो वो ऽ अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥ य ऽ उदाजन्पितरो गोमयं वस्वृतेना भिं
दन्परिवत्सरे वलं॥ दीर्घायुत्वमंगिरसो वो ऽ अस्तु प्रति॰॥ य ऽ ऋतेन सूर्यमारोहयन्दि

अप्रथयन्पृथिवीं मातरं वि॥ सुप्रजास्त्वमंगिर०॥ अयं नाभा वदति वल्गु वो गृहे देवपुत्राः
ऋषयस्तच्छृणोतन॥ सुब्रह्मण्यमंगिरसो०॥ विरूपास ऽ इदृषयस्त ऽ इद्गंभीरवेपसः॥ ते ऽ
अंगिरसस्सूनवस्ते ऽ अग्नेᳶ परिजज्ञिरे।१॥ ये ऽ अग्नेᳶ परिजज्ञिरे विरूपासो दिवस्परि॥ नवग्वो
नु दशग्वो ऽ अंगिरस्तमस्सचा देवेषु मंहते॥ इंद्रेण युजा निःसृजंत वाघतो व्रजं गोमंतमश्वि
नं॥ सहस्रं मे ददतो ऽ अष्टकर्ण्यः श्रवो देवेष्वक्रत॥ प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु॥
यस्सहस्रं शताश्वं सद्यो दानाय मंहते॥ न तमश्नोति कश्चन दिव ऽ इव सान्वारभं॥ सावर्ण्यस्य द
क्षिणा वि सिंधुरिव पप्रथे॥ उत दासा परिविषे स्मद्दिष्टी गोपरीणसा॥ यदुस्तुर्वश्च मामहे॥
सहस्रदा ग्रामणीर्मा रिषन्मनुस्सूर्येणास्य यतमानैतु दक्षिणा॥ सावर्णेर्देवाᳶ प्रतिरंत्वायुर्य
स्मिन्नश्रांता ऽ असनाम वाजं॥२॥ परावतो ये दिधिषंत ऽ आप्यं मनुप्रीतासो जनिमा वि

वस्वतः॥ ययातेर्ये नहुष्यस्य बर्हिषि देवाऽ आसते तेऽ अधि ब्रुवंतु नः॥ विश्वा हि वो नमस्या
नि वंद्या नामानि देवाऽ उत यज्ञियानि वः॥ ये स्थ जाताऽ अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इ
ह श्रुता हवं॥ येभ्यो माता मधुमत्पिन्वते पयᳶ पीयूषं द्यौरदितिरद्रिबर्हाः॥ उक्थशुष्मान्वृ
षभरान्त्स्वप्नसस्ताँ आदित्याँऽ अनु मदा स्वस्तये॥ नृचक्षसोऽ अनिमिषंतोऽ अर्हणा बृहद्देवा
सोऽ अमृतत्वमानशुः॥ ज्योतीरथाऽ अहिमायाऽ अनागसो दिवो वर्ष्माणं वसते स्वस्तये॥
सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृताऽ दधिरे दिवि क्षयं॥ ताँऽ आ विवास नमसा सुवृ
क्तिभिर्महोऽ आदित्याँऽ अदितिं स्वस्तये॥३॥ को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो
मनुषो यति ष्ठन॥ को वोध्वरं तुविजाताऽ अरं करद्यो नᳶ पर्षदत्यंह स्वस्तये॥ येभ्यो हो
ये९ त्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः॥ तऽ आदित्याऽ अभयं शर्म यच्छत सु

गानꣳ कर्त्त सुपथा स्वस्तये॥ यऽईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मंतवः॥ तेन
ꣳ कृणा रक्षताऽदेनसस्पर्यद्याद्देवासꣳ पिपृता स्वस्तये॥ भरेष्विंद्रं सुहवं हवामहेंहोमुचं सुकृतं दैव्यं
जनं॥ अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतस्वस्तये॥ सुत्रामाणं पृथिवीं द्याम
नेहसं सुशर्माणमदितिं सुप्रणीतिं॥ दैवीं नावं स्वरित्रामनागसमस्रवंतीमारुहेमा स्वस्तये
॥४॥ विश्वे यजत्राऽअधिवोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः॥ सत्यया वो देवहूत्या
हुवेम शृण्वतो देवाऽअवसे स्वस्तये॥ अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्राम
घायतः॥ आरे देवा द्वेषोऽअस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये॥ अरिष्टः स मर्तो वि
श्वऽएधते प्र प्रजाभिर्जायते धर्मणस्परि॥ यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरि
ता स्वस्तये॥ यं देवासोऽवथ वाजसातौ यं शूर साता मरुतो हिते धने॥ प्रातर्यावाणं रथमिंद्र

सं॰ भ॰
२३

सानसिमरिष्वंतमारुहेमास्वस्तये॥ स्वस्तिनᳶपथ्यासुधन्वसुस्वस्त्य१प्सुवृजनेस्वर्वति॥ स्व
स्तिनᳶपुत्रकृथेषुयोनिषुस्वस्तिरायेमरुतोदधातन॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्य
भियावाममेति॥ सानोऽअमासोऽअरणेनिपातुस्वावेशाभवतुदेवगोपा॥ एवाप्लतेस्सू
नुरवीवृधद्वोविश्वऽआदित्याऽअदितेमनीषी॥ ईशानासोनरोऽअमर्त्येनास्तावि जनोदि
व्योगयेन॥ ७॥ कथादेवानांकतमस्ययामनिसुमंतुनामशृण्वतांमनामहे॥ कोमृळाति
कतमोनोमयस्करत्कतमऽऊतीऽअभ्याववर्त्तति॥ क्रतूयंतिक्रतवोहृत्सुधीतयोवेनंतिवे
नाᳶपतयंत्यादिशः॥ नमर्डिताविद्यतेऽअन्यऽएभ्योदेवेषुमेऽअधिकामाऽअयंसत॥ न
रोवाशंसंपूषणमगोह्यमग्निंदेवेद्धमभ्यर्च्चसेगिरा॥ सूर्यामासाचंद्रमसायमंदिवित्रितंवा
तमुषसमक्तुमश्विना॥ कथाकविस्तुवीरवान्कयागिराबृहस्पतिर्वावृधतेसुवृक्तिभिः॥ अ

राम
२३

जऽ एकपात्सुहवेभिऽ ऋक्वभिरहिः शृणोतुबुध्न्यो३हवीमनि॥ दक्षस्यवादितेजन्मनिव्रतेराजा
नामित्रावरुणाविवाससि॥ अतूर्तपंथाᳶ पुरुरथोऽ अर्यमासप्तहोताविषुरूपेषुजन्मसु॥ ५
॥ तेनोऽ अर्वंतोहवनश्रुतोहवंविश्वेशृण्वंतुवाजिनोमितद्रवः॥ सहस्रसामेधसाताविवत्मना
महोयेधनंसमिथेषुजभ्रिरे॥ प्रवोवायुंरथयुजंपुरंधिंस्तोमैᳵ कृणुध्वंसख्यायपूषणं॥
तेहिदेवस्यसवितुस्सवीमनिक्रतुंसचंतेसचितस्सचेतसः॥ त्रिस्सप्तसस्रानद्योमहीरपोवनस्प
तीन्पर्वताँऽ अग्निमूतये॥ कृशानुमस्तॄन्तिष्यंसधस्थऽ आरुद्रंरुद्रेषुरुद्रियंहवामहे॥ सर
स्वतीसरयुस्सिंधुरूर्मिभिर्महोमहीरवसायंतुवक्षणीः॥ देवीरापोमातरस्सूदयित्न्वोघृत
वत्पयोमधुमन्नोऽ अर्चत॥ उतमाताबृहद्दिवाशृणोतुनस्त्वष्टादेवेभिर्जनिभिᳶ पिताव
चः॥ ऋभुक्षावाजोरथस्पतिर्भगोरण्वःशंसश्शशमानस्यपातुनः॥ १॥ रण्वस्संदृष्टौपितुमाँ

ईवक्षयोभद्रारुद्राणांमरुतामुपस्तुतिः॥ गोभिष्ष्यामयशसोजनेष्वासदादेवासऽइळयास
चेमहि॥ यांमेधियंमरुतऽइंद्रदेवाऽअददातवरुणमित्रयूयं॥ तांपीपयतपयसेवधेनुंकु
विद्गिरोऽअधिरथेवहाथ॥ कुविदंगप्रतियथाचिदस्यनस्सजात्यस्यमरुतोबुबोधथ॥ नाभा
यत्रप्रथमंसंनसामहेतत्रजामित्वमदितिर्दधातुनः॥ तेहिद्यावापृथिवीमातरामहीदेवीदेवा
जन्मनायज्ञियेऽइतः॥ उभेबिभृतऽउभयंभरीमभिᳶपुरूरेतांसिपितृभिश्चसिंचतः॥ विषा
होत्राविश्वमश्नोतिवार्यंबृहस्पतिररमतिᳶपनीयसी॥ ग्रावायत्रमधुषुदुच्यतेबृहदवीव
शंतमतिभिर्मनीषिणः॥ एवाकविस्तुवीरवाँऽऋतज्ञाद्रविणस्युर्द्रविणसश्चकानः॥ उक्थेभि
रत्रमतिभिश्चविप्रोपीपयद्गयोदिव्यानिजन्म॥ एवाप्लतेस्सूनु०॥ ८॥ अग्निरिंद्रोवरुणो
मित्रोऽअर्यमावायुᳶपूषासरस्वतीसजोषसः॥ आदित्याविष्णुर्मरुतस्स्वर्बृहत्सोमोरु

द्रोऽ अदितिर्ब्रह्मणस्पतिः॥ इंद्राग्नीवृत्रहत्येषुसत्पतीमिथोहिन्वानातन्वा३समोकसा॥ अं
तरिक्षंमह्यापप्रुरोजसासोमोघृतश्रीर्महिमानमीरयन्॥ तेषांहिमह्नामहतामनर्वणांस्तो
माँइयर्म्यृतज्ञाऽ ऋतावृधां॥ येऽ अप्सवमर्णवंचित्ररा धसस्तेनोरासंतांमहयेसुमित्र्याः॥
स्वर्णरमंतरिक्षाणिरोचनाद्यावाभूमीपृथिवीस्कंभुरोजसा॥ पृक्षाऽइवमहयंतसुरातयो
देवास्तवंतेमनुषायसूरयः॥ मित्रायशिक्षवरुणायदाशुषेयासम्राजामनसानप्रयुछ
तः॥ ययोर्धामधर्मणारोचतेबृहद्ययोरुभेरोदसीनाधसीवृतौ॥५॥ यागौर्वर्तनिंपर्येति
निष्कृतंपयोदुहानाव्रतनीरवारतः॥ साप्रब्रुवाणावरुणायदाशुषेदेवेभ्योदाशद्धविषावि
वस्वते॥ दिवक्षसोऽ अग्निजिह्वाऽ ऋतावृधःऽ ऋतस्ययोनिंविमृशंतेऽ आसते॥ द्यांस्कभित्व्य
१पऽ आचक्रुरोजसायज्ञंजनित्वीतन्वा३निमामृजुः॥ परिक्षितापितरापूर्वजावरीऽ ऋ

त्र

तस्ययोनाक्षयत स्समोकसा॥ द्यावापृथिवीवरुणायसव्रतेघृतवत्पयोमहिषायपिन्वतः॥ प
र्जन्यावातावृषभापुरीषिणेंद्रवायूवरुणोमित्रो ऽ अर्यमा॥ देवाँ ऽ आदित्याँ ऽ अदितिंहवामहे
येपार्थिवासोदिव्यासो ऽ अप्सुये॥ त्वष्टारंवायुमृभवोय ऽ ओहतेदैव्याहोतारा ऽ उषसंस्वस्त
ये॥ बृहस्पतिंवृत्रखादंसुमेधसमिंद्रियंसोमंधनसा ऽ उ ईमहे ॥१०॥ ब्रह्मगामश्वंजनयंत ऽ ओ
षधीर्वनस्पतीन्पृथिवींपर्वताँ ऽ अपः॥ सूर्यंदिविरोहयंतस्सुदानव ऽ आर्याव्रताविसृजं
तो ऽ अधिक्षमि॥ भुज्युमंहसः पिपृथोनिरश्विनाश्यावंपुत्रंवध्रिमत्या ऽ अजिन्वतं॥ कम
द्युवंविमदायोहथुर्युवंविष्णाप्वं ऽ विश्वकायावसृजथः॥ पावीरवीतन्यतुरेकपादजोदिवो
धर्तासिंधुराप स्समुद्रियः॥ विश्वेदेवासः शृणवन्वचांसिमेसरस्वतीसह धीभिः पुरं
ध्या॥ विश्वेदेवास्सह धीभिः पुरंध्यामनोर्यजत्रा ऽ अमृता ऽ ऋतज्ञाः॥ रातिषाचो ऽ अ

भिषावस्व विदिस्व श्रृगिरि ब्रह्मसूक्तं जुषेरन्त॥ देवान्वसिष्ठोऽ अमृतान्ववंदे ये विश्वा भुव
नाभि प्रतस्थुः॥ ते नो रासंतामु०॥ ११॥ देवान्हुवे बृहच्छ्रवसस्स्वस्तये ज्योतिष्कृतोऽ अध्वरस्य प्रचे
तसः॥ ये वावृधुः प्रतरं विश्ववेदसऽ इंद्रज्येष्ठासोऽ अमृताऽ ऋतावृधः॥ इंद्रप्रसूता वरुणप्र
शिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः॥ मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयंत
सूरयः॥ इंद्रो वसुभिः परिपातु नो गयमादित्यैर्नोऽ अदितिश्शर्म यच्छतु॥ रुद्रो रुद्रेभिर्देवो
मृळयाति नस्त्वष्टा नो ग्नाभिस्सुविताय जिन्वतु॥ अदितिर्द्यावापृथिवीऽ ऋतं महदिंद्राविष्णू म
रुतस्स्वर्बृहत्॥ देवाँऽ आदित्याँऽ अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससं॥ सरस्वान्धी
भिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना॥ ब्रह्मकृतोऽ अमृता विश्ववेदसश्शर्म नो
यंसन्त्रिवरूथमंहसः॥ २२॥ वृषा यज्ञो वृषणस्संतु यज्ञिया वृषणो देवा वृषणो हविष्कृतः॥

वृषणाद्यावापृथिवीऽऋतावरीवृषापर्जन्योवृषस्तुभः॥ अग्नीषोमावृषणावाजसातयेपुरु
प्रशस्तावृषणाउपब्रुवे॥ यावीजिरेवृषणोदेवयज्ययातानश्शर्मत्रिवरूथंवियंसतः॥ धृ
तव्रताःक्षत्रियायज्ञनिष्कृतोबृहद्दिवाऽअध्वराणामभिश्रियः॥ अग्निहोतारऽऋतसापो
ऽअद्रुहोपोऽअसृजन्ननुवृत्रतूर्ये॥ द्यावापृथिवीजनयन्नभिव्रतापऽओषधीर्वनिना
नियज्ञिया॥ अंतरिक्षंस्वरापप्रुरूतयेवशंदेवासस्तन्वी३निमामृजुः॥ धर्त्तारोदिवऽ
ऋभवस्सुहस्तावातापर्जन्यामहिषस्यतन्यतोः॥ आपऽओषधीःप्रतिरंतुनोगिरोभगो
रातिर्वाजिनोयंतुमेहवं॥२३॥ समुद्रस्सिंधूरजोऽअंतरिक्षमजऽएकपात्तनयित्नुरर्णवः॥
अहिर्बुध्न्यःशृणवद्वचांसिमेविश्वेदेवासऽउतसूरयोमम॥ स्यामवोमनवोदेववीतये
प्रांचंनोयज्ञंप्रणयतसाधुया॥ आदित्यारुद्रावसवस्सुदानवऽइमाब्रह्मशस्यमानानि

जिन्वत ॥ दैव्या होतारा प्रथमा पुरोहितऽ ऋतस्य पंथामन्वेमि साधुया ॥ क्षेत्रस्य पतिं प्रतिवेश
मीमहे विश्वान्देवाँऽ अमृताँऽ अप्रयुच्छतः ॥ वसिष्ठासᳶ पितृवद्वाचमक्रत देवाँऽ ईळानाऽ ऋ
षिवत्स्वस्तये ॥ प्रीताऽ इव ज्ञातयᳵ काममेत्यास्मे देवासोव धूनुता वसु ॥ देवान्वसिष्ठो० ॥
१४ ॥ इमां धियं सप्तशीर्ष्णीं पिता नऽ ऋतप्रजातां बृहतीमविंदत् ॥ तुरीयं स्विज्जनयद्वि
श्वजन्योयास्यऽ उक्थमिंद्राय शंसन् ॥ ऋतं शंसंतऽ ऋजु दीध्याना दिवस्पुत्रासोऽ असुर
स्य वीराः ॥ विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥ हंसैरिव सखिभिर्वा
वदद्भिरश्मन्मयानि नहना व्यस्यन् ॥ बृहस्पतिरभिकनिक्रदद्गाऽ उत प्रास्तौदुच्च वि
द्वाँऽ अगायत् ॥ अवो द्वाभ्यां परऽ एकया गा गुहा तिष्ठंतीरनृतस्य सेतौ ॥ बृहस्प
तिस्तमसि ज्योतिरिछन्नुदुस्राऽ आकर्वि हि तिस्रऽ आवः ॥ विभिद्या पुरं शयथे

मपाचीनिस्त्रीणिसाकमुदधेरकृंतत्॥ बृहस्पतिरुषसंसूर्यंगामर्कंविवेदस्तनयन्निवद्यौः॥ इं
द्रोवलंरक्षितारंदुघानांकरेणेवविचकर्ता रवेण॥ स्वेदांजिभिराशिरमिछमानोरोदय
त्पणिमागाऽअमुष्णात्॥२५॥ सऽईंसत्येभिस्सखिभिःशुचद्भिर्गोधायसंविधनसैरदर्दः॥
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणंव्यानट्॥ तेसत्येनमनसागोपतिंगाऽइयाना
सऽइषणयंतधीभिः॥ बृहस्पतिर्मिथोऽअवद्यपेभिरुदुस्रियाऽअसृजतस्वयुग्भिः॥ तंवर्ध
यंतोमतिभिःशिवाभिस्सिंहमिवनानदतंसधस्थे॥ बृहस्पतिंवृषणंशूरसातौभरेभरेऽ
अनुमदेमजिष्णुं॥ यदावाजमसनद्विश्वरूपमाद्यामरुक्षदुत्तराणिसद्म॥ बृहस्पतिंवृ
षणंवर्धयंतोनानासंतोबिभ्रतोज्योतिरासा॥ सत्यामाशिषंकृणुतावयोधैकीरिंचिद्ध्य ॥१०म ।
थुः [illegible]वस्वेभिरेवैः॥ पश्चामृधोऽअपभवंतुविश्वास्तद्रोदसीशृणुतंविश्वमिन्वे॥ इंद्रोमह्नाम

हतोऽर्णवस्यविमूर्धानमभिनदर्बुदस्य॥ अहन्नहिमरिणात्सप्तसिंधून्देवैर्द्यावापृथि
वीप्रावतंनः॥१२॥ उदप्रुतोनवयोरक्षमाणावावदतोऽअभ्रियस्येवघोषाः॥ गिरिभ्रजो
नोर्मयोमदंतोबृहस्पतिमभ्य१र्काऽअनावन्॥ संगोभिरांगिरसोनक्षमाणोभगऽइवेदर्यम
णंनिनाय॥ जनेमित्रोनदंपती अनक्तिबृहस्पतेवाजयाशूँरिवाजौ॥ साध्वर्याऽअति
थिनीरिषिरास्स्पार्हास्सुवर्णाऽअनवद्यरूपाः॥ बृहस्पतिःपर्वतेभ्योवितूर्यानिर्गाऽऊपेय
वमिवस्थिविभ्यः॥ आप्रुषायन्मधुनऽऋतस्ययोनिमवक्षिपन्नर्कऽउल्कामिवद्योः॥ बृह
स्पतिरुद्धरन्नश्मनोगाभूम्याऽउद्नेववित्वचंबिभेद॥ अपज्योतिषातमोऽअंतरिक्षादु
द्नश्शीपालमिववातऽआजत्॥ बृहस्पतिरनुमृश्यावलस्याभ्रमिववातऽआगाः॥ यदा ऽआचक्रऽ२
वलस्यपीयतोजसुंभेद्बृहस्पतिरग्नितपोभिरर्कैः॥ दद्भिर्नजिह्वापरिविष्टमाददाविर्नि

धीरक्षणोदुस्रियाणां॥२७॥ बृहस्पतिरमतहित्यदासांनामस्वरीणांसदनेगुहायत्॥ आं
डेवभित्वाशकुनस्यगर्भमुदुस्रियाः पर्वतस्यत्मनाजत्॥ अश्नापिनद्धंमधुपर्यपश्यन्म
त्स्यंनदीनऽउदनिक्षियंतं॥ निष्टज्जभारचमसंनवृक्षाद्बृहस्पतिर्विरवेणाविकृत्य॥ सोपा
मविंदत्सस्व१ः सोऽअग्निंसोऽअर्केणविबबाधेतमांसि॥ बृहस्पतिर्गोवपुषोवलस्य
निर्मज्जानंनपर्वणोजभार॥ हिमेवपर्णामुषितावनानिबृहस्पतिनाकृपयद्वलोगाः॥
अनानुकृत्यमपुनश्चकारयात्सूर्यामासामिथऽउच्चरातः॥ अभिश्यावंनकृशनेभिरश्वंन
क्षत्रेभिः पितरोद्यामपिंशन्॥ रात्र्यांतमोऽअदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिंविदद्गाः॥
इदमकर्मनमोऽअभ्रियायः पूर्वीरन्वानोनवीति॥ बृहस्पतिस्सहिगोभिस्सोऽअश्वैस्स
वीरेभिस्सन्नृभिर्नोवयोधात्॥[illegible] ऽ अनुवाकः॥ भद्राऽअग्नेर्वध्र्यश्वस्यसंदृशोवामीप्र

प॥तिस्सुरणाऽउपेतयः॥ यदींसुमित्राविशोऽअग्रऽइंधते घृतेनाहुतोजरतेद्विद्यु
तत्॥ घृतमग्नेर्वध्र्यश्वस्यवर्धनं घृतमन्नं घृतम्वस्यमेदनं॥ घृतेनाहुतऽउर्वियाविप
प्रथेसूर्यऽइवरोचतेसर्पिरासुतिः॥ यत्तेमनुर्यदनीकंसुमित्रस्समीधेऽअग्नेतदिदंनवीयः
॥ सरेवच्छोचसगिरोजुषस्वसवाजंदर्षिसऽइहश्रवोधाः॥ यंत्वापूर्वमीळितोवध्र्यश्वः स
मीधेऽअग्नेसऽइदंजुषस्व॥ सनस्तिपाऽउतभवातनूपादात्रंरक्षस्वयदिदंतेऽअस्मे॥ भ
वाद्युम्नीवाध्र्यश्वोतगोपामात्वातारीदभिमातिर्जनानां॥ शूरऽइवधृष्णुश्च्यवनस्सुमित्रः
प्रनुवोचंवाध्र्यश्वस्यनाम॥ समज्र्यापर्वसा३वसूनिदासावृत्राण्यार्याजिगेय॥ शूरऽ
इवधृष्णुश्च्यवनोजनानांत्वमग्नेपृतनायूंरभिष्याः॥१०॥ दीर्घतंतुर्बृहदुक्षायमग्नि
स्सहस्रस्तरीश्शतनीथऽऋभ्वा॥ द्युमान्द्युमत्सुनृभिर्मृज्यमानस्सुमित्रेषुदीदयोदेव

यत्सु॥ त्वे धेनुस्सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक्॥ त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः॥ देवाश्चित्तेऽअमृता जातवेदो महिमानं वाध्र्यश्व प्रवोचन्॥ यत्संपृच्छं मानुषीर्विशऽआयन्त्वं नृभिरजयस्त्वावृधेभिः॥ पितेव पुत्रमबिभरुपस्थे त्वामग्ने वध्र्यश्वस्सपर्यन्॥ जुषाणोऽअस्य समिधं यविष्ठोत पूर्वाँऽअवनोर्व्राधतश्चित्॥ शश्वदग्निर्वध्र्यश्वस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः॥ समनं चिददहश्चित्रभानोऽव व्राधन्तमभिनद्वृधश्चित्॥ अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः॥ स नोऽअजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व॥ २०॥ इमां मेऽअग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीं॥ वर्ष्मन्पृथिव्यास्सुदिनत्वेऽअह्नामूर्ध्वो भव सुक्रतो देवयज्या॥ आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः॥ ऋतस्य पथा नमसा मियेधो देवेभ्यो

देवतमस्सुषूदत् ॥ शश्वत्तममीळते दूत्याय हविष्मंतो मनुष्यासो ऽ अग्निं ॥ वहिष्ठैरश्वैस्सु
वृता रथेना देवान्वक्षि निषदेह होता ॥ विप्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्व
स्मे ॥ अहेळता मनसा देव बर्हिरिंद्रज्येष्ठाँ ऽ उशतो यक्षि देवान् ॥ दिवो वा सानु स्पृशता वरी
यᳶ पृथिव्या वा मात्रया विश्रयध्वं ॥ उशती ऽ द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वं ॥
२१ ॥ देवी दिवो दुहितरा सुशिल्पे ऽ उषासानक्ता सदतां नि योनौ ॥ आ वां देवास ऽ उशती ऽ उ
शंत ऽ उरौ सीदंतु सुभगे ऽ उपस्थे ॥ ऊर्ध्वो ग्रावा बृहदग्निस्समिद्धᳶ प्रिया धामान्यदितेरुप
स्थे ॥ पुहिता वृत्विजा यज्ञे अस्मिन्विदुष्टरा द्रविणमा यजेथां ॥ तिस्रो देवीर्बर्हिरिदं वरीय
ऽ आसीदत चकृमा वस्स्योनं ॥ मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषंत ॥ देवत
ष्ट यद्ध चारुत्वमानड्यदंगिरसामभवस्सचाभूः ॥ स देवानां पाथ ऽ उप प्र विद्वानुशन्य

रो

सं॰ अ॰
२०

क्षिद्द्रविणोदस्सुक्रतुः॥ वनस्पतेरशनयानियूयादेवानांपाथऽउपवक्षिविद्वान्॥ स्वदा
तिदेवᳵकृणवद्धवींष्यवतांद्यावापृथिवीहवंमे॥ आग्नेवहवरुणमिष्टयेनऽइंद्रंदिवोम
रुतोऽअंतरिक्षात्॥ सीदंतुबर्हिर्विश्वऽआयजत्रास्स्वाहादेवाऽअमृतामादयंतां॥२२॥
बृहस्पतेप्रथमंवाचोऽअग्रंयत्प्रैरतनामधेयंदधानाः॥ यदेषांश्रेष्ठंयदरिप्रमासी
त्प्रेणातदेषानिहितंगुहाविः॥ सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचम
क्रत॥ अत्रासखायस्सख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि॥ यज्ञेनवाचᳶ
पदवीयमायन्तामन्वविंदन्नृषिषुप्रविष्टां॥ तामाभृत्याव्यदधुᳶपुरुत्रातांसप्तरे
भाऽअभिसंवंनते॥ उतत्वᳶपश्यन्नददर्शवाचमुतत्वश्शृण्वन्नशृणोत्येनां॥ उतो
त्वस्मैतन्वं१विसस्रेजायेवपत्यऽउशतीसुवासाः॥ उतत्वंसख्येस्थिरपीतमाहुर्नैनंहि

राम
२०

न्वंसपिबाजिनेषु ॥ अधेन्वाचरतिमाययैषवाचंशुश्रुवाँऽअफलामपुष्पां ॥ २ ॥ यस्ति
त्याजसचिविदंसखायंनतस्यवाच्यपिभागोऽअस्ति ॥ यदींशृणोत्यलकंशृणोतिनहिप्र
वेदसुकृतस्यपंथां ॥ अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः ॥ आदघ्ना
सऽउपकक्षासऽउत्वेह्रदाऽइवस्नात्वाऽउत्वेददृश्रे ॥ हृदातष्टेषुमनसोजवेषुयद्ब्राह्मणा
संयजंतेसखायः ॥ अत्राहत्वंविजहुर्वेद्याभिरोहब्रह्माणोविचरंत्युत्वे ॥ इमेयेनार्वाङ्
परश्चरंतिनब्राह्मणासोनसुतेकरासः ॥ तऽएतेवाचमभिपद्यपापयासिरीस्तंत्रंतन्वते
ऽअप्रजज्ञयः ॥ सर्वेनंदंतियशसागतेनसभासाहेनसख्यासखायः ॥ किल्बिषस्पृत्पि
तुषणिर्ह्येषामरंहितोभवतिवाजिनाय ॥ ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगा
यतिशक्वरीषु ॥ ब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमात्रांविमिमीतऽउत्वः ॥ २४ ॥ ॥

ऽइतिअष्टमाष्टकेद्वितीयोध्यायः ॥ २ ॥ ऽॐ ३म् ॥ देवानांनुवयंजानाप्रवोचामविपन्यया ॥ उक्थे
षुशस्यमानेषुयः॰ पश्यादुत्तरेयुगे ॥ ब्रह्मणस्पतिरेतासंकर्मारऽइवाधमत् ॥ देवानांपूर्व्येयु
गेसतस्सदजायत ॥ देवानांयुगेप्रथमेसतस्सदजायत ॥ तदाशाऽअन्वजायंततदुत्तानपद
स्परि ॥ भूर्जज्ञऽउत्तानपदोभुवऽआशाऽअजायंत ॥ अदितेर्दक्षोऽअजायतदक्षाद्वदितिः॰
परि ॥ अदितिर्ह्यजनिष्टदक्षयादुहितातव ॥ तांदेवाऽअन्वजायंतभद्राऽअमृतबंधवः ॥ १ ॥
यद्देवाऽअदस्सलिलेसुसंरब्धाऽअतिष्ठत ॥ अत्रावोनृत्यतामिवतीव्रोरेणुरपायत ॥ यद्दे
वायतयोयथाभुवनान्यपिन्वत ॥ अत्रासमुद्रआगूळ्हमासूर्यमजभर्त्तन ॥ अष्टौपुत्रासो
ऽअदितेर्येजातास्तन्व१स्परि ॥ देवाँऽउपप्रैत्सप्तभिः॰ परामार्त्तंडमास्यत् ॥ सप्तभिःपुत्रै
रदितिरुपप्रैत्पूर्व्यंयुगं ॥ प्रजायैमृत्यवेत्वत्पुनर्मार्त्तंडमाभरत् ॥ २ ॥ जनिष्ठाऽउग्रस्सहसे

त्य

त

तुराय मंद्र ऽ ओजिष्ठो बहुलाभिमानः ॥ अवर्धन्निंद्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनि
ष्ठा ॥ द्रुहो निषत्ता पृश्नी चिदेवैः पुरू शंसेन वावृधुष्ट ऽ इंद्रं ॥ अभीवृतेव ता महापदेन ध्वां
तात्प्रपित्वादुदरंत गर्भाः ॥ ऋष्वा ते पादा प्र यज्जिगास्यवर्धन्वाजा ऽ उत ये चिदत्र ॥ त्वमिंद्र सालावृ
कान्त्सहस्रमासन्दधिषे ऽ अश्विना ववृत्याः ॥ समना तूर्णिरुप यासि यज्ञमा नासत्या सख्याय वक्षि
॥ वसाव्यामिंद्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥ मंदमान ऽ ऋतादधि प्रजायै सखिभि
रिंद्र ऽ इषिरेभिरर्थं ॥ आभिर्हि माया ऽ उप दस्युमागान्मिहः प्र तम्रा ऽ अवपत्तमांसि ॥ ४ ॥
सनामाना चिद्ध्वसयो न्यस्मा अवाहन्निंद्र ऽ उषसो यथानः ॥ ऋष्वैरगच्छः सखिभिर्निकामैः सा
कं प्रतिष्ठा हृद्या जघंथ ॥ त्वं जघंथ नमुचिं मखस्युं दासं कृण्वान ऽ ऋषये विमायं ॥ त्वं चकर्थ म
नवे स्योनान्पथो देवत्रांजसेव यानान् ॥ त्वमेतानि पप्रिषे वि नामेशान ऽ इंद्र दधिषे गभस्तौ ॥

सास ४

अनुत्वादेवाऽशवसामदंत्युपरिबुध्नान्वनिनश्चकर्थ॥ चक्रंयदस्याऽप्स्वानिषत्तमुतोतदस्मै
मध्विच्चच्छद्यात्॥ पृथिव्यामतिषितंयदूधः पयोगोष्वदधाऽओषधीषु॥ अश्वादियाये
तियद्वदंत्योजसोजातमुतमन्यऽएनं॥ मन्योरियायहर्म्येषुतस्थौयतः प्रजज्ञऽइंद्रोऽअ
स्यवेद॥ वयस्सुपर्णाऽउपसेदुरिंद्रंप्रियमेधाऽऋषयोनाधमानाः॥ अपध्वांतमूर्णुहि
पूर्धिचक्षुर्मुमुग्ध्यऽस्मान्निधयेवबद्धान्॥ ५॥ वसूनांवाचर्कृषऽइयक्षन्धियावायज्ञै
र्वारोदस्योः॥ अर्वंतोवायेऽरयिमंतस्सातौवनुंवायेसुश्रुणंसुश्रुतोधुः॥ हवऽएषामसुरोनक्षतद्यांश्रवस्यतामनसानिंसतक्षां॥ चक्षाणायत्रसुवितायदेवाद्यौर्नवारेभिः
कृणवंतस्वैः॥ इयमेषाममृतानांगीस्सर्वतातायेकृपणंतरत्नं॥ धियंचयज्ञंचसाधं
तस्तेनोधांतुवसव्यऽमसामि॥ आतत्तऽइंद्रायवः पनंताभियऽऊर्वंगोमंतंतितृत्सान्॥

सुकृत्वंऽ ये पुरुपुत्रां महीसहस्रधारां बृहतीदुदुक्षन्॥ शचीवऽ इंद्रमवसेकृणुध्वमनानतं
दमयंतं पृतन्यून्॥ ऋभुक्षणंमघवानंसुवृक्तिंभर्त्तायोवज्रंनर्यंपुरुक्षुः॥ यद्वावानपुरु
तमंपुराषाळावृत्रहेंद्रोनामान्यप्राः॥ अचेतिप्रासहस्पतिस्तुविष्मान्यदीमुश्मसिकर्त्त
वेकरत्तत्॥५॥ प्रसुवऽ आपोमहिमानमुत्तमंकारुर्वोचातिसदनेविवस्वतः॥ प्रसप्तसप्त
त्रेधाहिचक्रमुऽ प्रसृत्वरीणामतिसिंधुरोजसा॥ प्रतेरदद्वरुणोयातवेपथः॥ सिंधोय
द्वाजांऽ अभ्यद्रवस्त्वं॥ भूम्याऽ अधिप्रवतायासिसानुनायदेषामग्रंजगतामिरज्यसि॥
दिविस्वनोयततेभूम्योपर्यनंतंशुष्ममुदियर्तिभानुना॥ अभ्रादिवप्रस्तनयंतिवृष्टयःसिं
धुर्यदेतिवृषभोनरोरुवत्॥ अभित्वासिंधोशिशुमिन्नमातरोवाश्राऽ अर्षंतिपयसेव
धेनवः॥ राजेवयुध्वानयसित्वमित्सिचौयदासामग्रंप्रवतामिनक्षसि॥ इमंमेगंगे

सं॰ अ॰
२३

यमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृ
णुह्यासुषोमया॥ सितासितेसरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतंति॥ येवैतन्वं१वि
सृजंतिधीरास्तेजनासोऽअमृतत्वंभजंते॥ ६॥ तृष्टामयाप्रथमंयातवेसजूःसुसर्त्वार
सयाश्वेत्यात्या॥ त्वंसिंधोकुभयागोमतींक्रुमुंमेहत्न्वासरथंयाभिरीयसे॥ ऋजीत्येनीरु
शतीमहित्वापरिज्रयांसिभरतेरजांसि॥ अदब्धासिंधुरपसामपस्तमाश्वानचित्रावपु
षीवदर्शता॥ स्वश्वासिंधुःसुरथासुवासाहिरण्ययीसुकृतावाजिनीवती॥ ऊर्णावतीसी युवति ४
लमावत्युताधिवस्तेसुभगामधुवृधं॥ सुखंरथंयुयुजेसिंधुरश्विनंतेनवाजंसनिषदस्मि
न्नाजौ॥ महान्ह्यस्यमहिमापनस्यतेऽदब्धस्यस्वयशसोविरप्शिनः॥ ७॥ आवऽऋंजसऽ
ऊर्जांव्युष्टिष्विंद्रंमरुतोरोदसीऽअनक्तन॥ उभेयथानोऽअहनीसचाभुवासदःसदो

राम॰
२३

वरिवस्यान्तुवृत्रहा॥ तदुश्रेष्ठंसवनंसुनोतनात्योनहस्तयतोअद्रिःसोतरि॥ विदद्ध्याऽर्यो
अभिभूतिसंपौंमहोरायेचित्तरुत्तेयदर्वतः॥ तदिद्ध्यस्यसवनंविवेरपोयथापुरामनवेगा
तुमश्रेतु॥ गोऽअर्णसित्वाषेऽअश्वनिर्णिजिप्रेमध्वरेषध्वरांऽअशिश्रयुः॥ अपहतर
क्षसोभंगुरावतःस्कभायतनिर्ऋतिंसेधतामतिं॥ ऽआनोरयिंसर्ववीरंसुनोतनदेवाव्यं
भरतश्लोकमद्रयः॥ दिवश्चिदावोमवत्तरेभ्योविभ्वनाचिदाश्वपस्तरेभ्यः॥ वायोश्चिदासो
मरभस्तरेभ्योग्नेश्चिदर्चपितुकृत्तरेभ्यः॥२॥ भुरंतुनोयशसस्तोत्वधसोग्रावांवादिवि णोवा ४
तादिवित्मता॥ नरोयत्रदुहतेकाम्यंमध्वाघोषयंतोऽअभितोमिथस्तुरः॥ सुन्वंतिसोमंर
थिरासोऽअद्र्योनिरस्यरसंगविषोदुहंतिते॥ दुहंत्यूधरुपसेचनायकंनरोहव्यानम
र्जयंतऽआसभिः॥ एतेनरस्वपसोऽअभूतनयऽइंद्रायसुनुथसोममद्रयः॥ वामंवा

सं॰अ॰
२४

मंवोदिव्यायधाम्नेवसुवसुवᳶ पार्थिवायसुन्वते॥९॥ अभ्रप्रुषोनवाचाप्रुषावसुह
विष्मंतोनयज्ञाविजानुषः॥ सुमारुतंनब्रह्माणमर्हसे गणमस्तोष्येषांनशोभसे॥ श्रि
येमर्यासोऽअंजीँरकृण्वतसुमारुतंनपूर्वीरतिक्षपः॥ दिवस्पुत्रासऽएतानयेतिरऽआ
दित्यासस्तेऽअक्रानवावृधुः॥ प्रयेदिवᳶ पृथिव्यानबर्हणात्मनारिरिच्रेऽअभ्रान्नसूर्यः
॥ पाजस्वंतोनवीराᳶ पनस्यवोरिशादसोनमर्याऽअभिद्यवः॥ युष्माकंबुध्नेऽअपांनयाम
निविथुर्यतिनमहीश्रथर्यति॥ विश्वप्सुर्यज्ञोऽअर्वागयंसुवᳶ प्रयस्वंतोनसत्राचऽआग
त॥ यूयंधूर्षुप्रयुजोनरश्मिभिर्ज्योतिष्मंतोनभासाव्युष्टिषु॥ श्येनासोनस्वयशसोरि
शादसᳶ प्रवासोनप्रसितासᳶ परिप्रुषः॥१०॥ प्रयद्वहध्वेमरुतᳶ पराकाद्यूयंमह
स्संवरणस्यवस्वः॥ विदानासोवसवोराध्यस्याराच्चिद्द्वेषस्सनुतर्युयोत॥ यऽउदृचि

एम॰
२५

यज्ञेऽअध्वरेष्वामरुद्भ्योनमानुषोददाशत्॥ रेवत्सवयोदधतेसुवीरंसदेवानामपिगो
पीथेऽअस्तु॥ तेहियज्ञेषुयज्ञियासऽऊमाऽआदित्येननाम्नाशंभविष्ठाः॥ तेनोवंतुरथतूर्म
नीषांमहश्चयामन्नध्वरेचकानाः॥११॥ विप्रासोनमन्मभिस्स्वाध्योदेवाव्यो३नयज्ञैस्स्वप्न
सः॥ राजानोनचित्रास्सुसंदृशः क्षितीनांनमर्याऽअरेपसः॥ अग्निर्नयेभ्राजसारुक्मव
क्षसोवातासोनस्वयुजस्सद्यऽऊतयः॥ प्रज्ञातारोनज्येष्ठास्सुनीतयस्सुशर्माणोनसोमा
ऽऋतंयते॥ वातासोनयेधुनयोजिगत्नवोग्नीनांनजिह्वाविरोकिणः॥ वर्मण्वंतोनयो
धाश्शिमीवंतᳶपितॄणांनशंसास्सुरातयः॥ रथानांनये१राःस्सनाभयोजिगीवांसोनशू
राऽअभिद्यवः॥ वरेयवोनमर्याघृतप्रुषोभिस्वर्त्तारोऽअर्कंनसुष्टुभः॥ अश्वासोनयेज्येष्ठा
सऽआशवोदिधिषवोनरथ्यस्सुदानवः॥ आपोननिम्नैरुदभिर्जिगत्नवोविश्वरूपाऽ

सं॰अ॰
२५

अंगिरसोन सामभिः॥ १२॥ ग्रावाणोन सूरयस्सिंधुमातरऽ आदर्दिरासोऽ अद्रयो
नविश्वहा॥ शिशूलानक्रीळयस्सुमातरो महाग्रामोनयामन्नुतत्विषा॥ उषसांन
केतवोध्वरश्रियाश्शुभंयवोनांजिभिर्व्यश्वितन्॥ सिंधवोनययियोभ्राजदृष्टयः
परावतोनयोजनानिममिरे॥ सुभागांनोदेवाः कृणुतासुरत्नानस्मान्स्तोतॄन्मरु
तोवावृधानाः॥ अधिस्तोत्रस्यसख्यस्यगाततसनाद्धिवोरत्नधेयानिसंति॥ १३॥ अप
श्यमस्यमहतोमहित्वममर्त्यस्यमर्त्यासुविक्षु॥ नानाहनूविभृतेसंभरेतेऽ असिन्वती
बप्सतीभूर्यत्तः॥ गुहाशिरोनिहितमृधगक्षीऽ असिन्वन्नत्तिजिह्वयावनानि॥ अत्रा
ण्यस्मैपड्भिस्संभरंत्युत्तानहस्तानमसाधिविक्षु॥ प्रमातुः प्रतरंगुह्यमिच्छन्कुमारोन
वीरुधस्सर्पदुर्वीः॥ ससंनपक्वमविदच्छुचंतंरिरिह्वांसंरिपऽ उपस्थेऽ अंतः॥ तद्वामृतंरो

राम
२५

न्वो

दसी प्रब्रवीमि जायमानो मातरा गर्भो ऽ अत्ति ॥ नाहं देवस्य मर्त्यश्चिकेताग्निरंग विचेता
स्स प्रचेताः ॥ यो ऽ अस्मा ऽ अन्नं तृष्वा३दधात्याज्यैर्घृतैर्जुहोति पुष्यति ॥ तस्मै सहस्रम
क्षभिर्विचक्षेऽग्ने विश्वतᳶ प्रत्यङ्ङसि त्वं ॥ किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामवि
द्वान् ॥ अक्रीळन्क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त्त गामिवासिः ॥ विषूचो ऽ अश्वान्युयु
जे वनेजा ऽ ऋजीतिभी रशनाभिर्गृभीतान् ॥ चक्षदे मित्रो वसुभिस्सुजातस्समानृधे पर्वभि
र्वावृधानः ॥ २४ ॥ अग्निस्सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिःष्ठां ॥ अग्नी रोदसी
विचरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरंधिं ॥ अग्नेरप्नसस्समिदस्तु भद्राग्निर्मही रोदसी ऽ
आविवेश ॥ अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥ अग्निर्ह त्यं जरतᳵ
कर्णमावाग्निरद्भ्यो निरदहज्जरूथं ॥ अग्निरत्रिं घर्म ऽ उरुष्यदंतरग्निर्नृमेधं प्रज

सं॰अ॰
२६

पासञ्जत्सं॥ अग्निर्दाद्द्रविणंवीरपेशाऽ अग्निरृषिंयस्सहस्रासनोति॥ अग्निर्दिविहव्यमा
ततानाग्नेर्धामानिविभृतापुरुत्रा॥ अग्निमुक्थैरृषयोविह्वयंतेग्निंनरोयामनिबाधितासः
॥अग्निंवयोऽअंतरिक्षेपतंतोग्निस्सहस्रापरियातिगोनां॥ अग्निंविशऽईळतेमानुषीर्या
ऽअग्निंमनुषोनहुषोविजाताः॥ अग्निर्गांधर्वींपथ्यामृतस्याग्नेर्गव्यूतिर्घृतऽआनि
षत्ता॥ अग्नयेब्रह्मऽऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिं॥ अग्नेप्रावजरितारंय
विष्ठाग्नेमहिद्रविणमायजस्व॥२५॥ यऽइमाविश्वाभुवनानिजुह्वदृषिर्होतान्यसीदत्पि
तानः॥ सऽआशिषाद्रविणमिच्छमानःप्रथमच्छदवराँऽआविवेश॥ किंस्विदासीदधिष्ठा
नमारंभणंकतमत्स्वित्कथासीत्॥ यतोभूमिंजनयन्विश्वकर्माविद्यामौर्णोन्महिनावि
श्वचक्षाः॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥ संबाहुभ्यांध

राम
२६

मतिसंपतत्रैर्घावाभूमीजनयन्देवऽ एकः॥ किंस्विद्वनंकऽउसवृक्षऽआसयतोघावापृथि
वीनिष्टतुक्षुः॥ मनीषिणोमनसापृच्छतेदुतघदध्यतिष्ठद्भुवनानिधारयन्॥ यातेधामा
निपरमाणियावमायामध्यमाविश्वकर्मन्नुतेमा॥ शिक्षासखिभ्योहविषिस्वधावस्वयं
यजस्वतन्वंवृधानः॥ विश्वकर्मन्हविषावावृधानस्वयंयजस्वपृथिवीमुतद्यां॥ मुह्यंत्वन्ये
ऽअभितोजनासऽइहास्माकंमघवासूरिरस्तु॥ वाचस्पतिंविश्वकर्माणमूतयेमनोजुवंवा
जेऽअद्याहुवेम॥ सनोविश्वानिहवनानिजोषद्विश्वशंभूरवसेसाधुकर्मा॥१६॥ चक्षुषः
ᳶपितामनसाहिधीरोघृतमेनेऽअजनन्नम्नमाने॥ यदेदंताऽअदद्दृहंतपूर्वऽआदिद्या
वापृथिवीऽअप्रथेतां॥ विश्वकर्माविमनाऽआद्विहायाधाताविधातापरमोतसंदृक्॥
तेषामिष्टानिसमिषामदंतियत्रासप्तऽऋषीन्परऽएकमाहुः॥ योनःᳶपिताजनिता

योविधाताधामानिवेदभुवनानिविश्वा॥ योदेवानांनामधाऽएकऽएवतंसंप्रश्नंभुवनायं
त्यन्या॥ तऽआयजंतद्रविणंसमस्माऽऋषयःपूर्वेजरितारोनभूना॥ असूर्तेसूर्तेरज
सिनिषत्तेयेभूतानिसमकृण्वंनिमानि॥ परोदिवापरऽएनापृथिव्यापरोदेवेभिर
सुरैर्यदस्ति॥ कंस्विद्गर्भंप्रथमंदध्रऽआपोयत्रदेवाःसमपश्यंतविश्वे॥ तमिद्गर्भंप्र
थमंदध्रऽआपोयत्रदेवाःसमगच्छंतविश्वे॥ अजस्यनाभावध्येकमर्पितंयस्मिन्विश्वा
निभुवनानितस्थुः॥ नतंविदाथयऽइमाजजानान्यद्युष्माकमंतरंबभूव॥ नीहारेणप्रा
वृताजल्प्याचासुतृपऽउक्थशासश्चरंति॥१७॥ यस्तेमन्योविधद्वज्रसायकसहऽओ
जःपुष्यतिविश्वमानुषक्॥ साह्यामदासमार्यंत्वयायुजासहस्कृतेनसहसासहस्वता
॥ मन्युरिंद्रोमन्युरेवासदेवोमन्युर्होतावरुणोजातवेदाः॥ मन्युंविशऽईळतेमानु

षीर्या५ पाहि नो मन्यो तपसा सजोषाः॥ अभी हि मन्यो तवसस्तवीयान्तपसा युजा वि जहि
शत्रून्॥ अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः॥ त्वं हि मन्योऽ अभिभूत्योजाः
स्वयंभूर्भामोऽ अभिमातिषाहः॥ विश्वचर्षणिस्सहुरिस्सहावान्स्मास्वोजः५ पृतनासु धे
हि॥ अभागस्सन्नप परेतोऽ अस्मि तव क्रत्वा तविषस्य प्रचेतः॥ तं त्वा मन्योऽ अक्रतुर्जिहीळा
हं स्वा तनूर्बलदेयाय मेहि॥ अयं तेऽ अस्म्युप मेह्यर्वाङ्ऽ प्रतीचीनस्सहुरे विश्वधायः
॥ मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः॥ अभि प्रेहि दक्षिणतो भवा
मेधा वृत्राणि जंघनाव भूरि॥ जुहोमि ते धरुणं मध्वोऽ अग्रमुभाऽ उपांशु प्रथमा पि
बाव॥ २०॥ त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वः॥ तिग्मेषवऽ आ
युधा संशिशानाऽ अभि प्र यंतु नरोऽ अग्निरूपाः॥ अग्निरिव मन्यो त्विषितस्सहस्व

सं॰ अ॰ नानीर्नस्सहुरे हूत ऽ एधि॥ हत्वाय शत्रून्विभजस्व वेद ऽ ओजो मिमानो विमृधो नुदस्व॥ सहस्व म
२८ न्यो ऽ अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून्॥ उग्रंते पाजो नन्वा रुरुध्रे वशी व
शंनयस ऽ एकज त्वं॥ एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि॥ अकृत्त
रुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे॥ विजेषकृदिंद्र ऽ इवानवब्रवो ऽस्माकं म
न्यो ऽ अधिपा भवेह॥ प्रियंते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत ऽ आबभूथ॥ आभूत्या
सहजा वज्र सायक सहो बिभर्ष्यभिभूत ऽ उत्तरं॥ क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पु
रुहूत संसृजि॥ संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः॥ भियं दधा
ना हृदयेषु शत्रवः पराजितासो ऽ अप नि लयंतां॥ १९॥ ७ अनुवाकः॥ सत्येनोत्तभि एम
ता भूमिस्सूर्येणोत्तभिता द्यौः॥ ऋतेनादित्यास्तिष्ठंति दिवि सोमो ऽ अधिश्रितः॥ सोमेना २८

दिसा बलिनस्सोमेन पृथिवी मही॥ अथो नक्षत्राणामेषामुपस्थे सोमऽआहितः॥ सोमं मन्यते प
पिवान्यत्संपिंषंत्योषधिं॥ सोमं यं ब्राह्मणो विदुर्न तस्याश्नाति कश्चन॥ आछद्विधानैर्गुपितो
बार्हतैस्सोम रक्षितः॥ ग्राव्णामिच्छृण्वन्तिष्ठसि न तेऽअश्नाति पार्थिवः॥ यत्वा देव प्रपिबंति त
तऽआप्यायसे पुनः॥ वायुस्सोमस्य रक्षिता समानां मासऽआकृतिः॥२०॥ रैभ्यासीदनुदेयी ना
राशंसी न्योचनी॥ सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतं॥ चित्तिराऽउपबर्हणं चक्षुराऽअभ्यं
जनं॥ द्यौर्भूमिः कोशऽआसीद्यदयात्सूर्या पतिं॥ स्तोमाऽआसन्प्रतिधयः कुरीरं छंदऽओपशः
॥ सूर्यायाऽअश्विना वराग्निरासीत्पुरोगवः॥ सोमो वधूयुरभवदश्विनास्तामुभा वरा॥ सूर्यां यत्प
त्ये शंसंतीं मनसा सविताददात्॥ मनोऽअस्याऽअनऽआसीद्द्यौरासीदुत च्छदिः॥ शुक्रावनड्वाहावा
स्तां यदयात्सूर्या गृहं॥२१॥ ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः॥ श्रोत्रं ते चक्रेऽआ

स्तांदिविपंथाश्चराचरः॥ शुचीतेचक्रेयात्याव्यानोऽअक्षऽआहतः॥ अनोमनस्मयंसूर्यारोहत्
प्रयतीपतिं॥ सूर्यायावहतुᳵ प्रागात्सवितायमवासृजत्॥ अघासुहन्यंतेगावोऽर्जुन्योᳵ प
र्युह्यते॥ यदश्विनापृच्छमानावयातंत्रिचक्रेणवहतुंसूर्यायाः॥ विश्वेदेवाऽअनुतद्वामजा
नन्पुत्रᳵ पितराववृणीतपूषा॥ यदयातंशुभस्पतीवरेयंसूर्यामुप॥ क्वैकंचक्रंवामासी
त्क्वदेष्ट्रायतस्थथुः॥२२॥ द्वेतेचक्रेसूर्येब्रह्माणऽऋतुथाविदुः॥ अथैकंचक्रंयद्गुहातदद्धा
तयऽइद्विदुः॥ सूर्यायैदेवेभ्योमित्रायवरुणायच॥ येभूतस्यप्रचेतसऽइदंतेभ्योकरंनमः॥
पूर्वापरंचरतोमाययैतौशिशूक्रीळंतौपरियातोऽअध्वरं॥ विश्वान्यन्योभुवनाभिचष्टऽऋ
तूँरन्योविदधज्जायतेपुनः॥ नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं॥ भागंदेवेभ्यो
विदधात्यायन् प्रचंद्रमास्तिरतेदीर्घमायुः॥ सुकिंशुकंशल्मलिंविश्वरूपंहिरण्यवर्णंसुवृ

तंसुचक्रं॥ आरोह सूर्ये अमृतस्यलोकंस्योनंपत्येवहतुंकृणुष्व॥२३॥ उदीर्ष्वातःपतिवती
ह्ये१षाविश्वावसुंनमसागीर्भिरीळे॥ अन्यामिच्छपितृ षदंव्यक्तांसत्तेभागोजनुषात
स्यविद्धि॥ उदीर्ष्वातोविश्वावसोनमसेळामहेत्वा॥ अन्यामिच्छप्रफर्व्यं१ संजायांपत्यासृज॥
अनृक्षराऋजवस्सन्तुपंथायेभिस्सखायोयंतिनोवरेयं॥ समर्यमासंभगोनोनिनीयात्सं
जास्पत्यंसुयममस्तुदेवाः॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवितासुशेवः॥ स
तस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि॥ प्रेतोमुंचामिनामुतस्सुबद्धाममु
तस्करं॥ यथेयमिंद्रमीढ्वस्सुपुत्रासुभगासति॥२४॥ पूषात्वेतोनयतुहस्तगृह्याश्विना
त्वाप्रवहतांरथेन॥ गृहान्गच्छगृहपत्नीयथासोवशिनीत्वंविदथमावदासि॥ इहप्रियंप्र
जयातेसमृध्यतामस्मिन्गृहेगार्हपत्यायजागृहि॥ एनापत्यातन्वं१संसृजस्वाधाजि

सं॰ अ॰
३०

जीव्री विदथमावदाथः॥ नीललोहितं भवति कृत्यासक्तिर्व्यज्यते॥ एधंतेऽ अस्या ज्ञातयः पति
र्बंधेषु बध्यते॥ परादेहि शामुल्यं ब्रह्मभ्यो विभजावसु॥ कृत्यैषा पद्वती भूत्वा जाया विश
ते पतिं॥ अश्रीरा तनूर्भवति रुशती पापयामुया॥ पतिर्यद्वध्वो वाससा स्वमंगमभिधित्स
ते॥ ३०॥ ये वध्वश्चंद्रं वहतुं यक्ष्मा यंति जनादनु॥ पुनस्तान्यज्ञिया देवा नयंतु यतऽ आ
गताः॥ मा विदन्परिपंथिनो यऽ आसीदंति दंपती॥ सुगेभिर्दुर्गमतीतामपद्रांत्वरातयः॥
सुमंगलीरियं वधूरिमां समेत पश्यत॥ सौभाग्यमस्यै दत्वायाथास्तं विपरेतन॥ तृष्टमे
तत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे॥ सूर्यां यो ब्रह्मा विद्यात्सऽ इद्वाधूयमर्हति॥
आशसनं विशसनमथोऽ अधिविकर्तनं॥ सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुं
धति॥ ३५॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥ भगोऽ अर्यमा

राम
३०

सवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥ तांपूषञ्छिवतमामेरयस्वयस्यांबीजंमनुष्या
उवपंति॥ यानःऊरूःउशतीविश्रयातेयस्यामुशंतःप्रहरामशेपं॥ तुभ्यमग्रेपर्यवह
न्त्सूर्यांवहतुनासह॥ पुनःपतिभ्योजायांदाःअग्नेप्रजयासह॥ पुनःपत्नीमग्निरदा
दायुषासहवर्चसा॥ दीर्घायुरस्यायःपतिर्जीवातिशरदश्शतं॥ सोमःप्रथमोविवि
देगंधर्वोविविदःउत्तरः॥ तृतीयोःअग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः॥ २१॥ सोमोदद
दंधर्वायगंधर्वोददद्दग्नये॥ रयिंचपुत्राँश्चादादग्निर्मह्यमथोःइमां॥ इहैवस्तंमावियौ
ष्टंविश्वमायुर्व्यश्नुतं॥ क्रीळंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे॥ आनःप्रजांजनयतुप्र
जापतिराजरसायसमनक्त्वर्यमा॥ अदुर्मंगलीःपतिलोकमाविशशंनोभवद्विपदेशं
चतुष्पदे॥ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यस्सुमनास्सुवर्चाः॥ वीरसूर्देवका

सं॰अ॰
३१

मा स्योना शं नो भव॰ इमां त्वमिंद्र मीढ्वस्सुपुत्रां सुभगां कृणु॥ दशास्यां पुत्राना धेहि पति
मेकादशं कृधि॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव॥ ननोंदरि सम्राज्ञी भव सम्राज्ञी
ऽ अधि देवृषु॥ समंजंतु विश्वे देवास्समापो हृदयानि नौ॥ सं मातरिश्वा सं धाता समु दे
ष्ट्री दधातु नौ॥ २८॥ अथ परद्विष्टंम्॥ अविधवा भव वर्षाणि शतं साग्रं तु सुव्रता॥
तेजस्वी च यशस्वी च धर्मपत्नी पतिव्रता॥ जनयद्बहुपुत्राणि मा च दुःखंलंलभेत
क्वचित्॥ भर्त्ता ते सोमपानिस्संभवेद्बहुमपएयणः॥ अष्टपुत्रा भव त्वं च सुभगा च पति
व्रता॥ भर्त्तुश्चैव पितुर्भ्रातुर्हृदयानंदनी सदा॥ इंद्रस्य तु यथेंद्राणी श्रीधरस्य यथा श्रि
या॥ शंकरस्य यथा गौरी तद्वद्भर्त्तुरपि भर्त्तरि॥ अत्रेर्यथानसूया स्याद्वसिष्ठस्याप्यरुंधती
॥ कौशिकस्य यथा सती तथा त्वमपि भर्त्तरि॥ ध्रुवैधि पोष्यामह्यं त्वादाद्बृहस्पतिः॥ म
मयि १

एम
३१

यापत्या प्रजावती संजीव शरदः शतं ॥ २८ ॥ ऽ इति अष्टमाष्टके तृतीयो ध्यायः ॥ ३ ॥ ऽ
ॐ ३ म् ॥ विहि सोतोरसृक्षत नेंद्रं देवममंसत ॥ यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा वि
श्वस्मादिंद्र उत्तरः ॥ पराहींद्र धावसि वृषाकपेरति व्यथिः ॥ नो ऽ अह प्र विंदस्यन्यत्र सोमपी
तये विश्वं० ॥ किमयं त्वां वृषाकपिश्चकार हरितो मृगः ॥ यस्मा ऽ इरस्यसीदु न्वर्यो वा पुष्टि
मद्वसु वि० ॥ यमिमं त्वं वृषाकपिं प्रियमिंद्राभिरक्षसि ॥ श्वान्वस्य जंभिषदपि कर्णे वराहयुर्वि०
॥ प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ॥ शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं वि० ॥ ४ ॥ न
मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ॥ न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी वि०
॥ उवे ऽ अंब सुलाभिके यथेवांग भविष्यति ॥ भसन्मे ऽ अंब सक्थि मे शिरो मे वीव हृष्यति
वि० ॥ किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने ॥ किं शूरपत्नि नस्त्वमभ्यमीषि वृषाक

पिंवि०॥ अवीरामिवमामयंशरारुरभिमन्यते॥ उताहमस्मिवीरिणींद्रपत्नीमरुत्सखावि०
॥ संहोत्रंस्मपुरानारीसमनंवावगच्छति॥ वेधाऽऋतस्यवीरिणींद्रपत्नीमहीयते वि० २॥
इंद्राणीमासुनारिषुसुभगामहमश्रवं॥ नह्यस्याऽअपरंचनजरसामरतेपतिर्वि०॥
नाहमिंद्राणिरारणसख्युर्वृषाकपेर्ऋते॥ यस्येदमप्यंहविःप्रियंदेवेषुगच्छतिवि०
॥ वृषाकपायिरेवतिसुपुत्रऽआदुसुस्नुषे॥ घसत्तऽइंद्रऽउक्षणः प्रियंकाचित्करंह
विर्वि०॥ उक्ष्णोहिमेपंचदशसाकंपचंतिविंशतिं॥ उताहमद्मिपीवऽइदुभाकुक्षीपृणंति
मेवि०॥ वृषभोनतिग्मशृंगोंतर्यूथेषुरोरुवत्॥ मंथस्तऽइंद्रशंहृदेयंतेसुनोतिभाव
युर्वि०॥ ३॥ नसेशेयस्यरंबतेंतरासक्थ्याउकपृत्॥ सेदीशेयस्यरोमशंनिषेदुषोविजृं
भते वि०॥ नसेशेयस्यरोमशंनिषेदुषोविजृंभते॥ सेदीशेयस्यरंबतेंतरासक्थ्याउक

पृद्वि०॥ अयमिंद्र वृषाकपिः परस्वंतं हतं विदत्॥ असिं सूनां नवं चरुमादेधस्यान आ
चितं वि०॥ अयमेमि विचाकशद्विचिन्वन्दासमार्यं॥ पिबामि पाकसुत्वनोऽभि धीरमचाकशं
वि०॥ धन्व च यत्कृंतत्रं च कति स्वित्ता वि योजना॥ नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप वि०॥
पुनरेहि वृषाकपे सुविता कल्पयावहै॥ य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्वि०॥ यदु
दंचो वृषाकपे गृहमिंद्राजगंतन॥ क्व१ स्य पुल्वघो मृगः कमगं जनयोपनो वि०॥ पर्शु
र्ह नाम मानवी साकं ससूव विंशतिं॥ भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्वि०॥४॥
रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म॥ शिशानो अग्निः क्रतुभि
स्समिद्धस्स नो दिवा स रिषः पातु नक्तं॥ अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेद
स्समिद्धः॥ आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन्॥ उभोभयाविन्नु

पधेहिदंष्ट्राहिंस्रश्शिशानोवरंपरंच॥ उतांतरिक्षेपरियाहिराजंजंभैःसंधेह्यभियातुधाना
न्॥ यज्ञैरिषूस्संनममानोऽअग्नेवाचाशल्यांऽअशनिभिर्दिहानः॥ ताभिर्विध्यहृदयेया
तुधानान्प्रतीचोबाहून्प्रतिभंग्ध्येषां॥ अग्नेत्वचंयातुधानस्यभिंधिहिंस्राशनिर्हरसाहं
त्वेनं॥ प्रपर्वाणिजातवेदःशृणीहिक्रव्यात्क्रविष्णुर्विचिनोतुवृक्णं।५॥ यत्रेदानींपश्य
सिजातवेदस्तिष्ठंतमग्नऽउतवाचरंतं॥ यद्वांतरिक्षेपथिभिᳲपतंतंतमस्ताविध्यशर्वाशि
शानः॥ उतालब्धंस्पृणुहिजातवेदऽआलेभानादृष्टिभिर्यातुधानात्॥ अग्नेपूर्वोनिज
हिशोशुचानऽआमादःक्ष्विंकास्तमदंत्वेनीः॥ इहप्रब्रूहियतमस्सोऽअग्नेयोयातुधानो
यऽइदंकृणोति॥ तमारभस्वसमिधायविष्ठनृचक्षसश्चक्षुषेरंधयैनं॥ तीक्ष्णेनाग्ने
चक्षुषारक्षयज्ञंप्रांचंवसुभ्यᳲप्रणयप्रचेतः॥ हिंस्रंरक्षांस्यभिशोशुचानंमात्वादभ

न्यातुधानान्नृचक्षः॥ नृचक्षा रक्षᳶपरि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा॥ तस्याग्ने पृ
ष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च॥ ६॥ त्रिर्यातुधानᳶप्रसितिं त ऽ एत्वृतं यो
ऽ अग्ने ऽ अनृतेन हंति॥ तमर्चिषा स्फूर्जयन्जातवेदस्समक्षमेनं गृणते नि वृंग्धि॥ तदग्ने च
क्षुᳶप्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानं॥ अथर्ववज्ज्योतिषा दैव्येन सत्यं धू
र्वंतमचितं न्योष॥ यदग्ने ऽ अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयंत रेभाः॥ मन्योर्मन
सश्शरव्या३ जायते या तया विध्य हृदये यातुधानान्॥ परा शृणीहि तपसा यातुधा
नान्पराग्ने रक्षो हरसा शृणीहि॥ परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो ऽ अभि शोशु
चानः॥ पराद्य देवा वृजिनं शृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः॥ वाचास्तेनं शरव ऽ ऋच्छं
तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः॥७॥ यᳶपौरुषेयेण क्रविषा समंक्ते यो ऽ अश्व्ये

सं· अ·
३४

नपश्चुनोयातुधानः॥ योऽअघ्न्यायाभरतिक्षीरमग्नेतेषांशीर्षाणिहरसापिवृश्च॥ संव
त्सरीणंपयऽउस्रियायास्तस्यमाशीद्यातुधानोनृचक्षः॥ पीयूषमग्नेयतमस्तितृ
प्सात्तंप्रत्यंचमर्चिषाविध्यमर्मन्॥ विषंगवांयातुधानाᳶपिबंत्वावृश्च्यंतामदितये
दुरेवाः॥ परैनान्देवस्सवितादददातुपराभागमोषधीनांजयंतां॥ सनादग्नेमृणसिया
तुधानान्नत्वारक्षांसिपृतनासुजिग्युः॥ अनुदहसहमूरान्क्रव्यादोमातेहेत्यामुक्षतदै
व्यायाः॥ त्वंनोऽअग्नेऽअधरादुदक्तात्त्वंपश्चादुतरक्षापुरस्तात्॥ प्रतितेतेऽअजरासस्त
पिष्ठाऽअघशंसंशोशुचतोदहंतु॥-॥ पश्चात्पुरस्तादधरादुदक्तात्कविᳶकाव्येनपरि
पाहिराजन्॥ सखेसखायमजरोजरिम्णेऽग्नेमर्ताँऽअमर्त्यस्त्वंनः॥ परित्वाग्नेपुरंवयं
विप्रंसहस्यधीमहि॥ धृषद्वर्णंदिवेदिवेहंतारंभंगुरावतां॥ विषेणभंगुरावतᳶप्रति

वे॰

राम
३४

ष्म रक्षसो दह ॥ अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥ प्रसमग्ने मिथुना दह या
तुधानां किमीदिनः ॥ सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥ प्रत्यग्ने हरसा हरः शृ
णीहि विश्वतः प्रति ॥ यातुधानस्य रक्षसो बलं विरुज वीर्यम् ॥ ९ ॥ हविष्पांतमजरं स्व
र्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ॥ तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत
॥ गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ ॥ तस्य देवाः पृथिवी द्यौरुता
पोऽरणयन्नोषधीः सख्ये अस्य ॥ देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहं
तं ॥ यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्षं ॥ यो होतासीत्प्रथमो दे
वजुष्टो यं समांजन्नाज्येना वृणानाः ॥ स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जा
तवेदाः ॥ यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ॥ तं त्वाहेम मतिभि

सं॰अ॰
३५

गीर्भिरुक्थैस्स यज्ञियोऽअभवो रोदसिप्राः ॥१०॥ मूर्धा भुवो भवति नक्तमग्निस्ततस्सूर्यो
जायते प्रातरुद्यन् ॥ मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥ दृशे
न्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ॥ तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्वि
श्वऽआजुहवुस्तनूपाः ॥ सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयंत देवाः ॥ सऽ
एषां यज्ञोऽअभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥ यं देवासोऽजनयंताग्निं यस्मि
न्नाजुहवुर्भुवनानि विश्वा ॥ सोऽअर्चिषा पृथिवीं द्यामुतेमामृजूयमानोऽअतपन्महि
त्वा ॥ स्तोमेन हि दिवि देवासोऽअग्निमजीजनञ्छक्तिभी रोदसिप्रां ॥ तमूऽअकृण्वन्त्रे
धा भुवे कं सऽओषधीः पचति विश्वरूपाः ॥११॥ यदेदेनमदधुर्यज्ञियासो दिवि देवास्सू
र्यमादितेयं ॥ यदाच्चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥ विश्वस्माऽ

राम
३५

अग्निंभुवनायदेवावैश्वानरंकेतुमह्नामकृण्वन्॥आयस्ततानोषसोविभातीरपोऽऊर्णो
तितमोऽअर्चिषायन्॥वैश्वानरंकवयोयज्ञियासोग्निंदेवाऽअजनयन्नजुर्यं॥नक्ष
त्रंप्रत्नममिनच्चरिष्णुयक्षस्याध्यक्षंतविषंबृहंतं॥वैश्वानरंविश्वहादीदिवांसंमंत्रै
रग्निंकविमच्छावदामः॥योमहिम्नापरिबभूवोर्वीऽउतावस्तादुतदेवःपरस्तात्॥द्वेसृ
तीऽअशृणवंपितृणामहंदेवानामुतमर्त्यानां॥ताभ्यामिदंविश्वमेजत्समेतियदंतरा
पितरंमातरंच॥१२॥द्वेसमीचीबिभृतश्चरंतंशीर्षतोजातंमनसाविमृष्टं॥सप्रत्यङ्ःवि
श्वाभुवनानितस्थावप्रयुच्छन्तरणिर्भ्राजमानः॥यत्रावदेतेऽअवरःपरश्चयज्ञन्योः
कतरोनौविवेद॥आशेकुरित्सधमादंसखायोनक्षंतयज्ञंकऽइदंविवोचत्॥कत्यग्न
यःकतिसूर्यासःकत्युषासःकत्युस्विदापः॥नोपस्पिजंवःपितरोवदामिपृच्छा

मिवᳵ कवयो विद्मने कं ।। यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।। तावद्द
धात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ।। १३ ।। इंद्रं स्तवान्नृतमं यस्य मह्ना विबबा
धे रोचना वि ज्मो ऽ अंतान् ।। आ यᳶ पप्रौ चर्षणीधृद्वरोभिᳶ प्र सिंधुभ्यो रिरिचानो महि
त्वा ।। स सूर्यᳶ पर्युरू वरांस्येंद्रो ववृत्याद्रथ्येव चक्रा ।। अतिष्ठंतमपस्यं१ न सर्गं कृष्णा त
मांसि त्विष्या जघान ।। समानमस्मा ऽ अनपावृदर्च क्ष्मया दिवो ऽ असमं ब्रह्म नव्यं ।।
वि यᳶ पृष्ठेव जनिमान्यर्य ऽ इंद्रश्चिकाय न सखायमीषे ।। इंद्राय गिरो ऽ अनिशितसर्गा
ऽ अपᳶ प्रेरयं सगरस्य बुध्नात् ।। यो ऽ अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तंभ पृथिवीमु
त द्यां ।। आपांतमन्युस्तृपलप्रभर्मा धुनिश्शिमीवाञ्छरुमाँ ऽ ऋजीषी ।। सोमो विश्वान्यत
सा वनानि नार्वागिंद्रं प्रतिमानानि देभुः ।। १४ ।। न यस्य द्यावापृथिवी न धन्व नांतरिक्षं ना

द्रय स्सोमोऽ अक्षाः॥ यदस्य मन्युरधिनीयमानश्शृणाति वीळु रुजति स्थिराणि ॥ ज
घान वृत्रं स्वधितिर्वनेव रुरोज पुरोऽ अरदन्न सिंधून्॥ बिभेद गिरिं नवमिन्न कुंभमा
गाः इंद्रोऽ अकृणुत स्वयुग्भिः॥ त्वं ह त्य दृणयाऽ इंद्र धीरो सिर्न पर्व वृजिना शृणासि॥ प्र
ये मित्रस्य वरुणस्य धाम युजं न जना मिनंति मित्रं॥ प्र ये मित्रं प्रार्यमणं दुरेवाᳲ प्र संगि
रᳲ प्र वरुणं मिनंति॥ न्य१मित्रेषु वधमिंद्र तुम्रं वृषन्वृषाणमरुषं शिशीहि॥ इंद्रो दिवऽ
इंद्र ईशे पृथिव्याऽ इंद्रोऽ अपामिंद्रऽ इत्पर्वतानां॥ इंद्रो वृधामिंद्रऽ इन्मेधिराणामिंद्रः क्षेमे
योगे हव्यऽ इंद्रः॥ १७॥ प्राक्तुभ्यऽ इंद्रᳲ प्र वृधोऽ अहभ्यᳲ प्रांतरिक्षात्प्र समुद्रस्य धासेः॥
प्र वातस्य प्रथसᳲ प्र ज्मोऽ अंतात्प्र सिंधुभ्यो रिरिचे प्र क्षितिभ्यः॥ प्र शोशुचत्याऽ उष
सो न केतुरसिन्वा ते वर्त्ततामिंद्र हेतिः॥ अश्मेव विध्य दिवऽ आ सृजानस्तपिष्ठेन हेष

साह्वोप मित्रान्॥ अन्वह मासाऽ अन्विद्वनान्यन्वोषधीरनु पर्वतासः॥ अन्विंद्रं रोदसी वावशा
नेऽ अन्वापोऽ अजिहत जायमानं॥ कर्हि स्वित्सा त इंद्र चेत्यासदघस्य यद्भिनदो रक्षऽ एष
त॥ मित्रक्रुवो यच्छसने न गावः॥ पृथिव्याऽ आपृगमुया शयंते॥ शत्रूयंतोऽ अभि ये नस्त
तस्ने महि व्राधंतऽ ओगणास इंद्र॥ अंधेनामित्रास्तमसा सचंतां सुज्योतिषोऽ अक्तवस्ताँ
अभिष्युः॥ पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदन्गृणतामृषीणां॥ इमामाघोष
न्नवसा सहूतिं तिरो विश्वाँऽ अर्चतो याह्यर्वाङ्॥ एवा ते वयमिंद्र भुंजतीनां विद्याम सुमती
नां नवानां॥ विद्याम वस्तोरवसा गृणंतो विश्वामित्राऽ उत त इंद्र नूनं॥ शुनं हुवेम मघ
वानमिंद्रमस्मिन्भरे नृतमं वाजसातौ॥ शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजि
तं धनानां॥ १८॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वास

तिष्ठद्दशांगुलं॥ पुरुषऽ एवेदंसर्वंयद्भूतंयच्चभव्यं॥ उतामृतत्वस्येशानोयदन्नेनातिरोह
ति॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि
॥ त्रिपादूर्ध्वऽउदैत्पुरुषऽ पादोस्येहाभवत्पुनः॥ ततोविष्वङ्ऽव्यक्रामत्साशनानशने
ऽअभि॥ तस्माद्विराळजायतविराजोऽअधिपूरुषः॥ सजातोऽअत्यरिच्यतपश्चाद्भूमि
मथोपुरः॥१७॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसंतोऽअस्यासीदाज्यंग्रीष्मऽइ
ध्मश्शरद्धविः॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥ तेनदेवाऽअयजंतसाध्याऽ
ऋषयश्चये॥ तस्माद्यज्ञात्सर्वहुतस्संभृतंपृषदाज्यं॥ पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्रा
म्याश्चये॥ तस्माद्यज्ञात्सर्वहुतऽऋचस्सामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्माद
जायत॥ तस्मादश्वाऽअजायंतयेकेचोभयादतः॥ गावोहजज्ञिरेतस्माज्जाताऽअजा

स्मात्त

वयः॥ १८॥ यत्पुरुषंव्यदधुᳵकतिधाव्यकल्पयन्॥ मुखंकिमस्यकौबाहूकाऽऊरूपादाऽउ
च्येते॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यᳵकृतः॥ ऊरूतदस्ययद्वैश्यᳵपद्भ्योꣳशूद्रोऽअजा
यत॥ चंद्रमामनसोजातश्चक्षोस्सूर्योऽअजायत॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजाय
त॥ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौस्समवर्त्तत॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँऽअ
कल्पयन्॥ सप्तास्यासन्परिधयस्त्रिस्सप्तसमिधᳵकृताः॥ देवायद्यज्ञंतन्वानाऽअबध्न
न्पुरुषंपशुं॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्॥ तेहनाकंमहिमा
नस्सचंतयत्रपूर्वेसाध्यास्संतिदेवाः॥ २०॥ ऽअनुवाकः॥ संजागृवद्भिर्जरमाणऽइध्यतेद
मेदमूनाऽइषयन्निळस्पदे॥ विश्वस्यहोताहविषोवरेण्योविभुर्विभावासुषखासखीय
ते॥ सदर्शतश्रीरतिथिर्गृहेगृहेवनेवनेशिश्रियेतक्ववीरिव॥ जनंजनंजन्योनातिमन्य

ते विशऽ आक्षेति विश्यो३ विशंविशं॥ सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि वि
श्ववित्॥ वसुर्वसूनां क्षयसि त्वमेक इद्द्यावा च यानि पृथिवी च पुष्यतः॥ प्रजानन्नग्ने तव यो
निमृत्वियमिळायास्पदे घृतवंतमासदः॥ आ ते चिकित्रऽ उषसामिवेतयो रेपसस्सूर्यस्येव
रश्मयः॥ तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्रऽ उषसां न केतवः॥ यदोषधीरभिसृ
ष्टो वनानि च परि स्वयं चिनुषेऽ अन्नमास्ये॥ २०॥ तमोषधीर्दधिरे गर्भमृत्वियं तमापोऽ अग्निं
जनयंत मातरः॥ तमित्समानं वनिनश्च वीरुधोंतर्वतीश्च सुवते च विश्वहा॥ वातोपधूत
ऽइषितो वशाँऽ अनु तृषु यदन्ना वेविषद्वितिष्ठसे॥ आ ते यतंते रथ्यो३ यथा पृथक्शर्धां
स्यग्नेऽ अजराणि धक्षतः॥ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिं॥
तमिदर्भे हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत्॥ त्वामिदत्र वृणते त्वायवो होता

रमग्ने विदथ्ये सुवेधसः ॥ यद्देवयंतो दधति प्रयांसि ते हविष्मंतो मनवो वृक्तबर्हिषः ॥ तवा
ग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ॥ तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा
चासि गृहपतिश्च नो दमे ॥ २१ ॥ यस्तुभ्यमग्नेऽअमृताय मर्त्यः समिधा दाशदुत वा ह
विष्कृति ॥ तस्य होता भवसि यासि दूत्यमुप ब्रूषे यजस्यध्वरीयसि ॥ इमाऽअस्मै म
तयो वाचोऽअस्मदाँऽऋचो गिरः सुष्टुतयः समग्मत ॥ वसूयवो वसवे जातवेदसे वृद्धा
सु चिद्वर्धनो यासु चाकनत् ॥ इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्माऽउशते शृ
णोतु नः ॥ भूयाऽअंतरा हृद्यस्य निस्पृशे जायेव पत्यऽउशती सुवासाः ॥ यस्मिन्नश्वा
सऽऋषभासऽउक्षणो वशा मेषाऽअवसृष्टासऽआहुताः ॥ कीलालपे सोमपृष्ठाय
वेधसे हृदा मतिं जनये चारुमग्नये ॥ अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सो

मः॥ वाजसनिंरयिमस्मेसुवीरंप्रशस्तंधेहियशसंबृहंतं॥ २२॥ यज्ञस्यवोरथ्यंविश्पतिं
विशांहोतारमक्तोरतिथिंविभावसुं॥ शोचञ्छुष्कासुहरिणीषुजर्भुरद्वृषाकेतुर्यजतो
द्यामशायत॥ इममंजस्पामुभयेऽअकृण्वतधर्माणमग्निंविदथस्यसाधनं॥ अक्तुंन
यह्वमुषसःपुरोहितंतनूनपातमरुषस्यनिंसते॥ बळस्यनीथाविपणेश्चमन्महेव
याऽअस्यप्रहुताऽआसुरत्तवे॥ यदाघोरासोऽअमृतत्वमाशतादिज्जनस्यदैव्यस्यच
र्किरन्॥ ऋतस्यहिप्रसितिर्द्यौरुरुव्यचोनमोमह्य१रमतिःपनीयसी॥ इंद्रोमित्रोव
रुणस्संचिकित्रिरेथोभगस्सविताप्तदक्षसः॥ प्ररुद्रेणययिनायंतिसिंधवस्ति
रोमहीमरमतिंदधन्विरे॥ येभिःपरिज्मापरियन्नुरुज्रयोविरोरुवज्जठरेविश्वमुक्ष
ते॥ २३॥ क्राणारुद्रामरुतोविश्वकृष्टयोदिवश्श्येनासोऽअसुरस्यनीळयः॥ तेभि

श्वष्टेवरुणोमित्रोऽ अर्यमेंद्रोदेवेभिरर्वशेभिरर्वशः॥ इंद्रेभुजंशशमानासऽ आशत
सूरोदृशीकेवृषणश्चपौंस्ये॥ प्रयेन्वस्यार्हणाततक्षिरेयुजंवज्रंनृषदनेषुकारवः॥
सूरश्चिदाहरितोऽ अस्यरीरमदिंद्रादाकश्चिद्भयतेतवीयसः॥ भीमस्यवृष्णोजठरा
स्तंनबाधितः दभिश्वसोदिवेदिवेसहुरिः स्तोमंवोऽ अद्यरुद्रायशिक्वसेक्षयद्वीरायनमसादिदि
ष्टन॥ येभिश्शिवस्स्ववाँऽ एवयावभिर्दिवस्सिषक्तिस्वयशानिकामभिः॥ तेहिप्रजा
याऽ अभरंतविश्रवोबृहस्पतिर्वृषभस्सोमजामयः॥ यज्ञैरथर्वाप्रथमोविधारयद्दे
वादक्षैर्भृगवस्संचिकित्रिरे॥२४॥ तेहिद्यावापृथिवीभूरिरेतसानराशंसश्चतुरं
गोयमोदितिः॥ देवस्त्वष्टाद्रविणोदाऽ ऋभुक्षणः प्ररोदसीमरुतोविष्णुरर्हिरे॥
उतस्यनःऽ उशिजामुर्वियाकविरहिःशृणोतुबुध्न्यो३हवीमनि॥ सूर्यामासावि

चरंतादिविक्षिता धियाशमीनहुषीऽ अस्यबोधतं ॥ प्रनᳶ पूषाचरथंविश्वदेव्योपां
नपादवतुवायुरिष्टये ॥ आत्मानंवस्योऽ अभिवातमर्चततदश्विनासुहवायामनिश्रु
तं ॥ विशामासामभयानामधिक्षितंगीर्भिरुस्वयशसंगृणीमसि ॥ ग्नाभिर्विश्वाभिरदि
तिमनर्वणमक्तोर्युवानंनृमणाऽ अधापतिं ॥ रेभदत्रजनुषापूर्वोऽ अंगिराग्रावाणऽऊ
र्ध्वाऽ अभिचक्षुरध्वरं ॥ येभिर्विहायाऽ अभवद्विचक्षणᳶ पाथस्सुमेकंस्वधितिर्वन
न्वति ॥ २५ ॥ महिद्यावापृथिवीभूतमुर्वीनारीयह्वीनरोदसीसदंनः ॥ तेभिर्नᳶ पातंसह्य
सऽ एभिर्नᳶ पातंशूषणि ॥ यज्ञेयज्ञेसमर्त्योदेवान्त्सपर्यति ॥ यस्सुम्नैर्दीर्घश्रुत्तमऽ
आविवासात्येनान् ॥ विश्वेषामिरज्यवोदेवानांवार्महः ॥ विश्वेहिविश्वमहसोविश्वेय
ज्ञेषुयज्ञियाः ॥ तेघाराजानोऽ अमृतस्यमंद्राऽ अर्यमामित्रोवरुणᳶ परिज्मा ॥ कद्रु

सं॰अ॰
४२

द्रोन्नृणांस्तुतोमरुतᳶपूषणोभगः॥उतनोनक्तमपांवृषण्वसूसूर्यामासासदनायसध
न्या॥सचायत्ताघेषामहिर्बुध्न्येषुबुध्न्यः॥२६॥उतनोदेवावश्विनाशुभस्पतीधामभि
मित्रावरुणाऽउरुष्यतां॥महस्सरायऽएषतेतिधन्वेवदुरिता॥उतनोरुद्राचिन्मळ
तामश्विनाविश्वेदेवासोरथस्पतिर्भगः॥ऋभुर्वाजःऋभुक्षणᳶपरिज्माविश्ववेदसः
॥ऋभुऽऋभुक्षाऽऋभुर्विधतोमदऽआतेहरीजूजुवानस्यवाजिना॥दुष्टरंयस्यसाम
चिदृधग्यज्ञोनमानुषः॥कृधीनोऽअह्रयोदेवसवितस्सचस्तुषेमघोनां॥सहोनः
इंद्रोवह्निभिर्न्येषांचर्षणीनांचक्रंरश्मिंनयोयुवे॥ऐषुद्यावापृथिवीधातंमहदस्मे
वीरेषुविश्वचर्षणिश्रवः॥पृक्षंवाजस्यसातयेपृक्षंरायोततुर्वणे॥२७॥एतंशंसमिं
द्रास्मयुष्ट्वंकूचित्संतंसहसावन्नभिष्टयेसदापाह्यभिष्टये॥मेदतांवेदतावसो॥ए

॥एम॥
४२

तं मे स्तोमं तन्ना न सूर्ये द्युतद्यामानं वावृधंत नृणां॥ संवननं नाश्व्यं तष्टेवानपच्युतं॥
वावर्त्त येषां राया युक्तैषां हिरण्ययी॥ नेमधिता न पौंस्या वृथेव विष्टांता॥ प्रतद्दुःशी
मे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु॥ ये युक्त्वाय पंच शतास्मयु पथा विश्राव्ये
षां॥ अधीन्न्वत्र सप्ततिं च सप्त च॥ सद्यो दिदिष्ट तान्वस्सद्यो दिदिष्ट मायवः॥२८॥ प्रैते
वदंतु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः॥ यदद्रयᳶ पर्वतास्साकमाशवः श्लो
कं घोषं भरथेंद्राय सोमिनः॥ एते वदंति शतवत्सहस्रवदभि क्रंदंति हरितेभिरा
सभिः॥ विष्ट्वी ग्रावाणस्सुकृतस्सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत॥ एते वदं
त्यविदन्नना मधुन्यूङ्खयंतेऽ अधि पक्वऽ आमिषि॥ वृक्षस्य शाखामरुणस्य बप्स
तस्ते सूभर्वा वृषभाᳶ प्रेमराविषुः॥ बृहद्वदंति मदिरेण मंदिनेंद्रं क्रोशंतोविदन्न

पार्थ्यः
सद्योदिदिष्ट
[illegible]४

सं० अ०
४२

न्नामधु॥ संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयंतः पृथिवीमुपब्दिभिः॥ सुपर्णा
वाचमक्रतोप द्यव्याखरे कृष्णाऽइषिराऽअनर्तिषुः॥ न्यङ्ङ्नियंत्युपरस्य निष्कृतं पुरु
रेतो दधिरे सूर्यश्वितः॥ २१॥ उग्राऽइव प्रवहंतः समायमुः साकं युक्ता वृषणो बिभ्र
तो धुरः॥ यच्छ्वसंतो जग्रसानाऽअराविषुः शृण्वऽएषां प्रोथथोऽअर्वतामिव
॥ दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः॥ दशाभीशुभ्योऽअर्च
ताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः॥ तेऽअद्रयो दशयंत्रासऽआशवस्तेषामाधा
नं पर्येति हर्यतं॥ तऽऊ सुतस्य सोम्यस्यांधसोंऽशोः पीयूषं प्रथमस्य भेजिरे॥ ते सोमा
दो हरीऽइंद्रस्य निंसतेंऽशुं दुहंतोऽअध्यासते गवि॥ तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विं
द्रो वर्धते प्रथते वृषायते॥ वृषा वोऽअंशुर्न किला रिषाथने ळावंतः सदमित्स्थना

ऋग
४२

शिताः॥ रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो ऽअजुषध्वमध्वरं॥१०॥ तृदिला

ऽअतृदिलासो ऽअद्रयो ऽश्रमणा ऽअशृथिता ऽअमृत्यवः॥ अनातुरा ऽअजरा स्थाम

विष्णवः सुपीवसो ऽअतृषिता ऽअतृष्णजः॥ ध्रुवा एव वः पितरो युगेयुगे क्षेमका

मासः सदसो न युंजते॥ अजुर्यासो हरिषाचो हरिद्रव ऽआ द्यां रवेण पृथिवीमशुश्र

वुः॥ तदिद्वदंत्यद्रयो विमोचने यामन्नंजस्पा ऽइव घेदुपब्दिभिः॥ वपंतो बीजमिव धान्या

मिनं — कृतः पृंचंति सोमं न ति बप्सतः॥ सुते ऽअध्वरे ऽअधि वाचमक्रता क्रीळयो न मातरं तुदं

तः॥ वि षू मुंचा सुषुवुषो मनीषां वि वर्तंतामद्रयश्चायमानाः॥१४॥ इति अष्टमाष्टके

चतुर्थोध्यायः॥४॥ ऽॐ ३म्र॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै

नु॥ न नौ मंत्रा ऽअनुदितास ऽएते मयस्करन्परतरे चनाहन्॥ किमेता वाचा कृण

सं॰ अ॰
४३

वो

वातेहंप्राक्रमिषमुषसामग्रियेव॥ पुरूरवः पुनरस्तंपरेहिदुरापनावातऽइवाहम
स्मि॥ इषुर्नश्रियऽइषुधेरसनागोषाःशतसानरंहिः॥ अवीरेक्रतौविदविद्युतन्नो
रानमायुंचितयंतधुनयः॥ सावसुदधतीश्वशुरायवयऽउषोयदिवष्ट्यंतिगृहा
त्॥ अस्तंननक्षेयस्मिन्चाकन्दिवानक्तंश्नथितावैतसेन॥ त्रिःस्ममाह्नःश्नथयो
वैतसेनोतस्ममेव्यत्यैपृणासि॥ पुरूरवोनुतेकेतमायंराजामेवीरतन्वःस्तदा
सीः॥ १॥ यासुजूर्णिःश्रेणिःसुम्नऽआपिर्ह्रदेचक्षुर्नग्रंथिनीचरण्युः॥ ताऽअं
जयोरुणयोनसस्रुःश्रियेगावोनधेनवोनवंत॥ समस्मिञ्जायमानऽआसत
ग्नाऽउतेमवर्धन्नद्यःस्वगूर्ताः॥ महेयत्त्वापुरूरवोरणायावर्धयन्दस्युहत्या
यदेवाः॥ सचायदासुजहतीष्वत्कममानुषीषुमानुषोनिषेवे॥ अपस्ममत्तर

राम
४३

संतीन भुज्युस्ताऽ अत्रसन्नरथस्पृशो नाश्वाः॥ यदासु मर्त्तोऽ अमृतासु निस्पृक् सं
क्षोणीभिꣳ क्रतुभिर्न पृंक्ते॥ ताऽ आतयो न तन्वः शुंभत स्वाऽ अश्वासो न क्रीळयो दं
दशानाः॥ विद्युन्न या पतंती दविद्योद्भरंती मेऽ अप्या काम्यानि॥ जनिष्टोऽ अपो न
र्यस्सुजातꣳ प्रोर्वशी तिरत दीर्घमायुः॥ २॥ जज्ञिषऽ इत्था गोपीथ्याय हि दधाथ तत्पु
रूरवो मऽ ओजः॥ अशासं त्वा विदुषी सस्मिन्नहन्न मऽ आशृणोꣳ किमभुग्वदासि
॥ कदा सूनुꣳ पितरं जातऽ इच्छाच्चक्रन्नाश्रु वर्त्तयद्विजानन्॥ को दंपती समनसा वि
यूयोदध यदग्निश्श्वशुरेषु दीदयत्॥ प्रति ब्रवाणि वर्त्तयतेऽ अश्रु चक्रन्न क्रंददा
ध्यै शिवायै॥ प्र तत्ते हिनवा यत्तेऽ अस्मे परेह्यस्तं नहि मूर मापः॥ सुदेवोऽ अद्य प्रपतेद
नावृत्परावतं परमां गंतवाऽ उ॥ अधा शयीत निर्ऋतेरुपस्थेधैनं वृका रभसासोऽ

सं॰ अ॰
४४
व

अध्कः॥ पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासोऽअशिवासऽउ क्षन्॥ न वै स्त्रैणानि
सख्यानि संति सालावृकाणां हृदयान्येता॥३॥ यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरद
श्चतस्रः॥ घृतस्य स्तोकं सकृदह्नऽआश्नां तादेवेदं तातृपाणा चरामि॥ अंतरिक्षप्रां
रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः॥ उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृ
दयं तप्यते मे॥ इति त्वा देवाऽइमऽआहुरैळ यथेमेतद्भवसि मृत्युबंधुः॥ प्रजा ते देवा
न्हविषा यजाति स्वर्गऽउ त्वमपि मादयासे॥ऽउदप्सामवसर्थेर्वि योय धारणं लाभंग
वो मन्यमानाः॥ पुरूरवः पुनरस्तं परेह्यामे मनो देवजनाऽअयान्त्सुः॥५॥ प्रत्तेम
हे विदथे शंसिषं हरी प्रत्ते वन्वे वनुषो हर्यतं मदं॥ घृतं न यो हरिभिश्चारु सेवतऽआ
त्वा विशंतु हरिवर्पसं गिरः॥ हरिं हि योनिमभि ये समस्वरन्हिन्वंतो हरी दिव्यं यथ

पा॰ २

राम
४४

ष्यासदः ॥ आयंपृणंतिहरिभिर्नधेनवऽइंद्रायशूषंहरिवंतमर्चत ॥ सोऽअस्यव
ज्रोहरितोयऽआयसोहरिर्निकामोहरिरागभस्त्योः ॥ द्युम्नीसुशिप्रोहरिमन्युसा
यकऽइंद्रेनिरूपाहरितामिमिक्षिरे ॥ दिविनकेतुरधिधायिहर्यतोविव्यचद्वज्रोह
रितोनरंह्या ॥ तुददहिंहरिशिप्रोयऽआयसस्सहस्रशोकाऽअभवद्धरिंभरः ॥ त्वंत्वम
हर्यथाऽउपस्तुतः पूर्वेभिरिंद्रहरिकेशयज्वभिः ॥ त्वंहर्यसितवविश्वमुक्थ्यऽमसा
मिराधोहरिजातहर्यतं ॥ ५ ॥ तावज्रिणंमंदिनंस्तोम्यंमदऽइंद्रंरथेवहतोहर्यता
हरी ॥ पुरूण्यस्मैसवनानिहर्यतऽइंद्रायसोमाहरयोदधन्विरे ॥ अरंकामायह
रयोदधन्विरेस्थिरायहिन्वन्हरयोहरीतुरा ॥ अर्वद्भिर्योहरिभिर्जोषमीयतेसोऽ
अस्यकामंहरिवंतमानशे ॥ हरिश्मशारुर्हरिकेशऽआयसस्तुरस्पेयेयो

हरिपाऽ अवर्धत॥ अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी॥ स्रुवेव
यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः॥ प्र यत्कृते चमसे मर्मृजद्धरी
पीत्वा मदस्य हर्यतस्यांधसः॥ उत स्म सद्म हर्यतस्य पस्त्यो३रत्यो न वाजं हरिवांऽ अचि
क्रदत्॥ मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा॥२॥ आ रोदसी
हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियं॥ प्र पस्त्यमसुर हर्यतं गोराविष्कृ
धि हरये सूर्याय॥ आ त्वा हर्यंतं प्रयुजो जनानां रथे वहंतु हरिशिप्रमिंद्र॥ पिबा य
था प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिं॥ अपाः पूर्वेषां हरिवः सुतानाम
थो इदं सवनं केवलं ते॥ ममद्धि सोमं मधुमंतमिंद्र सत्रा वृषञ्जठरऽ आ वृषस्व॥३॥
याऽ ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धामानि

प्र

सतत्वं ॥ शतं वोऽ अंब धामानि सहस्रमुत वो रुहः ॥ अधा शतक्रत्वो यूयमिमं मेऽ अग
दं कृत ॥ ओषधीᳶ प्रति मोदध्वं पुष्पवतीᳶ प्रसूवरीः ॥ अश्वाऽ इव सजित्वरी वीरुधᳶ
पारयिष्ण्वः ॥ ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ॥ सनेयमश्वं गां वासऽ आत्मानं
तव पूरुष ॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाज इत्किलासथ यत्सन
वथ पूरुषं ॥ ~ ॥ यत्रौषधीस्समग्मत राजानस्समिताविव ॥ विप्रस्सऽ उच्यते भिषग्र
क्षोहामीवचातनः ॥ अश्वावतीं सोमावतीमूर्जयंतीमुदोजसं ॥ आवित्सि सर्वाऽ ओष
धीरस्माऽ अरिष्टतातये ॥ उच्छुष्माऽ ओषधीनां गावो गोष्ठादिवेरते ॥ धनं सनिष्यंती
नामात्मानं तव पूरुष ॥ इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः ॥ सीराᳶ पतत्रिणी स्थ
न यदामयति निष्कृथ ॥ अति विश्वाᳶ परिष्ठाः स्तेनऽ इव व्रजमक्रमुः ॥ ओषधीᳶ प्राचु

ष्यत्वुर्यत्किंच तन्वो३रपः ॥९॥ यदिमा वाजयन्नहमोषधीर्हस्त आदधे ॥ आत्माय
क्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ यस्यौषधीः प्रसर्पथांगमंगं परुष्परुः ॥ ततो
यक्ष्मं विबाधध्वऽउग्रो मध्यमशीरिव ॥ साकं यक्ष्म प्रपत चाषेण किकिदीविना ॥
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ अन्या वोऽअन्यामवत्वन्यान्यस्याऽउपाव
त ॥ तास्सर्वास्संविदानाऽइदं मे प्रावता वचः ॥ याः फलिनीर्याऽअफलाऽअपुष्पा
याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः ॥१०॥ मुंचंतु मा शपथ्यादथो
वरुण्यादुत ॥ अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ अवपतंतीरवदन्दिव
ओषधयस्परि ॥ यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ याऽओषधीस्सोमराज्ञी
र्बुश्शत विचक्षणाः ॥ तासां त्वमस्युत्तमारं कामाय शं हृदे ॥ याऽओषधीस्सोमराज्ञी

विष्ठिताः पृथिवीमनु॥ बृहस्पतिप्रसूताऽ अस्यैसंदत्तवीर्यं॥ मावोरिषत्खनिताय
स्मैचाहंखनामिवः॥ द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरं॥ याश्चेदमुपशृण्वंतियाश्च
दूरंपरागताः॥ सर्वास्संगत्यवीरुधोस्यैसंदत्तवीर्यं॥ ओषधयस्संवदंते सोमेनसहरा
ज्ञा॥ यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि॥ त्वमुत्तमास्योषधेतववृक्षाऽ उपस्त
यः॥ उपस्तिरस्तुसो३स्माकंयोऽ अस्माँऽ अभिदासति॥ परिशिष्टं॥ यच्छकृतंयदकृतं
यदेनश्चकृमावयं॥ ओषधयस्तस्मासांतुदुरितादेनसस्परि॥ ११ बृहस्पतेप्रतिमे
देवतामिहिमित्रोवायद्वरुणोवासिपूषा॥ आदित्यैर्वायद्वसुभिर्मरुत्वान्त्सपर्जन्यंशं
तनवेवृषाय॥ आदेवोदूतोऽ अजिरश्चिकित्वान्त्वद्देवापेऽ अभिमामगच्छत्॥ प्रती
चीनः प्रतिमामाववृत्स्वदधामितेद्युमतींवाचमासन्॥ अस्मेधेहिद्युमतींवाचमा

मं॰ अ॰ सन्बृहस्पतेऽ अनमीवामिषिरां॥ ययावृष्टिंशंतनवेवनावदिवोद्रप्सोमधुमाँऽआ
४७ विवेश॥ आनोद्रप्सामधुमंतोविशंत्विंद्रदेह्यधिरथंसहस्रं॥ निषीदहोत्रमृतुयाय
जस्वदेवान्देवापेहविषासपर्य॥ आर्ष्टिषेणोहोत्रमृषिर्निषीदन्देवापिर्देवसुमतिं
चिकित्वान्॥ सऽउत्तरस्मादधरंसमुद्रमपोदिव्याऽअसृजद्वर्ष्याऽअभि॥ अस्मिन्त्स
मुद्रेऽअध्युत्तरस्मिन्नापोदेवेभिर्निवृताऽअतिष्ठन्॥ ताऽअद्रवन्नार्ष्टिषेणेनस
ष्टादेवापिनाप्रेषितामृक्षिणीषु॥ २॥ यद्देवापिःशंतनवेपुरोहितोहोत्रायवृतः
कृपयन्नदीधेत्॥ देवश्रुतंवृष्टिवनिंरराणोबृहस्पतिर्वाचमस्माऽअयच्छत्॥ यं
त्वादेवापिःशुशुचानोऽअग्नऽआर्ष्टिषेणोमनुष्यःसमीधे॥ विश्वेभिर्देवैरनुम ॥एम॥
द्यमानःप्रपर्जन्यमीरयावृष्टिमंतं॥ त्वांपूर्वऽऋषयोगीर्भिरायन्त्वामध्वरेषुपुरु ४७

हूतविश्वे॥ सहस्राण्यधिरथ्यान्यस्मेऽआनोयज्ञंरोहिदश्वोपयाहि॥ एतान्यग्नेनवति
र्नवत्वेऽआहुतान्यधिरथ्यासहस्रा॥ तेभिर्वर्धस्वतन्वश्शूरपूर्वीर्दिवोनोवृष्टिमिषितो
रिरीहि॥ एतान्यग्नेनवतिंसहस्रासंप्रयच्छवृष्णऽइंद्रायभागं॥ विद्वान्पथऽऋतु
शोदेवयानानप्यौलानंदिविदेवेषुधेहि॥ अग्नेबाधस्वविमृधोविदुर्गहापामीवा
मपरक्षांसिसेध॥ अस्मात्समुद्राद्बृहतोदिवोनोपांभूमानमुपनस्सृजेह॥ २३॥ कंन
श्चित्रमिषण्यसिचिकित्वान्पृथुग्मानंवाश्रंवावृधध्यै॥ कत्तस्यदातुशवसोव्युष्टौ
तक्षद्वज्रंवृत्रतुरमपिन्वत्॥ सहिद्युताविद्युतावेतिसामपृथुंयोनिमसुरत्वाससाद
॥ ससनीळेभिःप्रसहानोऽअस्यभ्रातुर्नऽऋतेसप्तथस्यमायाः॥ सवाजंयातापदु
ष्पदायन्त्स्वर्षातापरिषदत्सनिष्यन्॥ अनर्वायच्छतदुरस्यवेदोघ्नञ्छिश्नदेवाँऽ

अभिवर्पसा भूत्॥ सयह्वोऽव नीर्गोष्वर्वा जुहोति प्रधन्यासु सस्त्रिः॥ अपादोयत्र युज्यासो
रथाद्रोण्यश्वासऽ ईरते घृतं वाः॥ सरुद्रेभिरशस्तवारऽ ऋभ्वा हित्वी गयमारेऽ अवद्यऽ आ
गात्॥ वम्रस्य मन्ये मिथुना विवव्रीऽ अन्नमभीत्यारोदयन्मुषायन्॥ सऽ इद्दासं तुवी
रवं पतिर्दन्षळक्षन्त्रिशीर्षाणं दमन्यत्॥ अस्य त्रितो न्वोजसा वृधानो विपा वराहम
योऽ अग्रया हन्॥ १४॥ सद्रुह्वणे मनुषऽ ऊर्ध्वसानऽ आसाविष दर्शसानाय शरुं
॥ सनृतमो नहुषोऽस्मत्सु जातः पुरोभिनदर्हन्दस्युहत्ये॥ सोऽ अभ्रियो न यवसऽ
उदन्यन्क्षयाय गातुं विदन्नोऽ अस्मे॥ उप यत्सीददिंदुं शरीरैः श्येनोयोपाष्टिर्हन्तिदस्यू
न्॥ सव्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात्॥ अयं कविमनयच्छ
स्यमानमत्कं योऽ अस्य सनितोत नृणां॥ अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरु

ण्योनमायी॥ अयंकनीनऽऋतुपाऽअवेद्यमिमीताररुंयश्चतुष्पात्॥ अस्यस्तोमेभिरौ
शिजऽऋजिश्वाव्रजंदरयद्वृषभेणपिप्रोः॥ सुत्वायद्यजतोदीदयद्गीᳶपुरऽइयानो
ऽअभिवर्पसाभूत्॥ एवामहेऽअसुरवक्षथायवम्रकᳶपड्भिरुपसर्पदिंद्रं॥ सऽइयान
स्वस्ति ᳵकरतिस्व[illegible]मस्माऽइषमूर्जंसुक्षितिंविश्वमाभाः॥ १५॥ ८ अनुवाकः॥ इंद्रदृह्यमघ
वन्त्वावदिद्भुजऽइहस्तुतस्सुतपाबोधिनोवृधे॥ देवेभिर्नस्सविताप्रावतुश्रुतमास
र्वतातिमदितिंवृणीमहे॥ भरायसुभरतभागमृत्वियंप्रवायवेशुचिपेक्रंददिष्टये॥
गौरस्ययᳶपयसᳶपीतिमानशऽआस०॥ आनोदेवस्सवितासाविषद्वयऽऋजू
यतेयजमानायसुन्वते॥ यथादेवान्प्रतिभूषेमपाकवदास०॥ इंद्रोऽअस्मेसुमना
ऽअस्तुविश्वहाराजासोमस्सुवितस्याध्येतुनः॥ यथायथामित्रधितानिसंदधुरास०॥

सं॰अ॰
४०

इंद्रऽउक्थेनशवसापरुर्दधेबृहस्पतेप्रतरीतास्यायुषः॥ यज्ञोमनुᳶप्रमतिर्नᳶपिताहिकं
मासु०॥ इंद्रस्यनुसुकृतंदैव्यंसहोग्निर्गृहेजरितामेधिरᳵकविः॥ यज्ञश्चभूद्विदथेचारु
रंतमऽआसु०॥१६॥ नवोगुहाचकृमभूरिदुष्कृतंनाविष्ट्यंवसवोदेवहेळनं॥ माकिर्नोदे
वाऽअनृतस्यवर्पसऽआसु०॥ अपामीवांसवितासाविषन्न्य१ग्वरीयऽइदपसेधंत्वद्रयः
॥ ग्रावायत्रमधुषुदुच्यतेबृहदास०॥ ऊर्ध्वोग्रावावसवोस्तुसोतरिविश्वाद्वेषांसिस
नुतर्युयोत॥ सनोदेवस्सवितापायुरीड्यऽआस०॥ ऊर्जंगावोयवसेपीवोऽअत्तनऽ
ऋतस्ययास्सदनेकोशेऽअंग्ध्वे॥ तनूरेवतन्वोऽअस्तुभेषजमासु०॥ क्रतुप्रावाजरि
ताशश्वतामवःऽइंद्रऽइद्भद्राप्रमतिस्सुतावतां॥ पूर्णमूधर्दिव्यंयस्यसिक्तयऽआसु०॥
चित्रस्तेभानुᳵक्रतुप्राऽअभिष्टिस्संतिस्पृधोजरणिप्राऽअधृष्टाः॥ रजिष्ठयारज्याप

राम
४०

श्वऽ आ गोस्तृतूर्षत्तिपर्यग्निंदुवस्युः॥१२॥ उद्बुध्यध्वंसमनसस्सखायस्समग्निमिंध्वंब
हवस्सनीळाः॥ दधिक्रामग्निमुषसंचदेवीमिंद्रावतो वसे नि ह्वये वः॥ मंद्राकृणुध्वंधियः
आ तनुध्वंनावमरित्रपरणींकृणुध्वं॥ इष्कृणुध्वमायुधारंकृणुध्वंप्रांचंयज्ञंप्रणयतास
खायः॥ युनक्तसीराबियुगातनुध्वंकृतेयोनौवपतेहबीजं॥ गिराचश्रुष्टिस्सभराऽअस
न्नोनेदीयऽइत्सृण्यः पक्वमेयात्॥ सीरायुंजंतिकवयोयुगावितन्वतेपृथक्॥ धीरादे
वेषुसुम्नया॥ निराहावान्कृणोतनसंवरत्रादधातन॥ सिंचामहाऽअवतमुद्रिणंवयंसु
षेकमनुपक्षितं॥ इष्कृताहावमवतंसुवरत्रंसुषेचनं॥ उद्रिणंसिंचेऽअक्षितं॥१८॥ प्री
णीताश्वान्हितंजयाथस्वस्तिवाहंरथमित्कृणुध्वं॥ द्रोणाहावमवतमश्मचक्रमंसत्रको
शंसिंचतानृपाणं॥ व्रजंकृणुध्वंसहिवोनृपाणोवर्मसीव्यध्वंबहुलापृथूनि॥ पुरः

सं·अ·
५०

च्चमसो १

ऽ१कृणुध्वमायसीरधृष्टा मावस्सुस्रौदृंहतातं ॥ आवोधियंयज्ञियांवर्त्तऽऊतयेदेवादेवींय
जतांयज्ञियामिह ॥ सानोदुहीययवसेवगत्वीसहस्रधारापयसामहीगौः ॥ आतूषिंचह
रिमींद्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ॥ परिष्वजध्वंदशकक्ष्याभिरुभेधुरौप्रतिवह्निं
युनक्त ॥ उभेधुरौवह्निरापिब्दमानोंतर्योनेवचरतिद्विजानिः ॥ वनस्पतिंवनऽआस्थापयध्वं
निषूदधिध्वम नंतऽउत्सं ॥ कपृन्नरऽ१कपृथमुद्दधातनचोदयतखुदतवाजसातये ॥
निष्टिग्र्यऽ१पुत्रमाच्यावयोतयऽइंद्रंसबाधऽइहसोमपीतये ॥१०॥ प्रतेरथंमिथूकृतमिं
द्रोवतुधृष्णुया ॥ अस्मिन्नाजौपुरुहूतश्रवाय्ये धनभक्षेषुनोव ॥ उत्स्मवातोवहतिवासो
ऽअस्याऽअधिरथंयदजयत्सहस्रं ॥ रथीरभून्मुद्गलानीगविष्टौभरेकृतंव्यचेदिंद्रसे
ना ॥ अंतर्यच्छजिघांसतोवज्रमिंद्राभिदासतः ॥ दासस्यवामघवन्नार्यस्यवासनुतर्य

एम·
५०

हृ
वयावधं॥ उद्नो ह्रदमपिबज्जर्हृषाणᳵ कूटंस्म तृंहदभिमातिमेति॥ प्रमुष्कभारः श्रवऽ इच्छमा
नोजिरं बाहूऽ अभरत्सिषासन्॥ न्यक्रंदयन्नुपयंतऽ एनममेहयन्वृषभं मध्यऽ आजेः॥
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलᳶ प्रधने जिगाय॥ ककर्दवे वृषभो युक्तऽ आसीदवावची
त्सारथिरस्य केशी॥ दुधेर्युक्तस्य द्रवतः सहानसऽ ऋच्छंति ष्मा निष्पदो मुद्गलानीं ॥२०॥ उ
त प्रधिमुद्वहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन्॥ इंद्रऽ उदावत्पतिमघ्न्यानामरंहत प
द्याभिᳵ ककुद्मान्॥ शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः॥ नृम्णानि कृण्वन्बह ऋ४
वे जनाय गाᳶ पस्पशानस्तविषीरधत्त॥ इमं तं पश्य वृषभस्य युंजं काष्ठाया मध्ये द्रुघ
णं शयानं॥ येन जिगाय शतवत्सहस्रं गवां मुद्गलᳶ पृतनाज्येषु॥ आरेऽ अघा को न्वि१त्था द
दर्श यं युंजंति तम्वा स्थापयंति॥ नास्मै तृणं नोदकमा भरंत्युत्तरो वहति प्रदेदिशत्॥ प
हृ२ धुरो१

सं॰अ॰ रिवृक्तेवेप तिविद्यमानुट्पीप्यानाकूवक्रेणेवसिंचनु॥ एषैष्याविद्रूय्याजयेमस्तुमंगलंसि
५१ नेवहस्तसातं॥ त्वंविश्वस्यजगतश्चक्षुरिंद्रासिचक्षुषः॥ वृषायदाजिंवृषणासिषाससि
चोदयन्नवध्रिणायुजा॥२१॥ आशुशिशानो वृषभोनभीमो घनाघनःक्षोभश्चर्षणीनां ग २
॥संक्रंदनोनिमिषऽएकवीरश्शतंसेनाऽअजयत्साकमिंद्रः॥ संक्रंदनेनानिमिषेणजि
ष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥ तदिंद्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा
॥सऽइषुहस्तैस्सनिषंगिभिर्वशीसंस्रष्टासयुधऽइंद्रोगणेन॥ संसृष्टजित्सोमपाबाहु
शर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँऽअपबाधमा
नः॥ प्रभंजत्सेनाः प्रमृणोयुधाजयन्नस्माकमेध्यवितारथानां॥ बलविज्ञायस्थवि एम
रः प्रवीरस्सहस्वान्वाजीसहमानऽउग्रः॥ अभिवीरोऽअभिसत्वासहोजाजैत्रमिंद्ररथ ५१

मानिष्ठगोविन्त्॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥ इमंसजाताऽअ
नुवीरयध्वमिंद्रंसखायोऽअनुसंरभध्वं॥२२॥ अभिगोत्राणिसहसागाहमानोदयोवी
रश्शतमन्युरिंद्रः॥ दुश्च्यवनःपृतनाषाळयुध्योऽस्माकंसेनाऽअवतुप्रयुत्सु॥ इंद्रऽआ
सांनेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः॥ देवसेनानामभिभंजतीनांमरुतोयं जयंतीनां४
त्वग्रं॥ इंद्रस्यवृष्णोवरुणस्यराज्ञऽआदित्यानांमरुतांशर्धऽउग्रं॥ महामनसांभुवनच्य
वानांघोषोदेवानांजयतामुदस्थात्॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानां
मनांसि॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः॥ अस्माकमिंद्र
स्समृतेषुध्वजेष्वस्माकंयाऽइषवस्ताजयंतु॥ अस्माकंवीराऽउत्तरेभवंत्वस्मांऽउदेवाः
अवताहवेषु॥ अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि॥ अभिप्रेहिनिर्दह

ता १

हृत्सु शोकैरंधेनामित्रास्तमसा सचंतां॥ प्रेता जयता नरः इंद्रो वश्शर्म यछतु॥ उग्रा वस्सं
तु बाहवोनाधृष्या यथासथ॥ पदशिष्टं॥ असौ या सेना मरुतᳶ परेषामभ्यैति नः ओ
जसा स्पर्धमाना॥ तां गूहत तमसापव्रतेन यथामीषामन्योः अन्यं न जानात्॥ अंधाः
अमित्रा भवताशीर्षाणः अहयः इव तेषां वोः अग्निदग्धानामग्निमूढानामिंद्रो हं
तु वरंवरं॥ २३॥ असावि सोमᳶ पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयं॥ तुभ्यं गिरो वि
प्रवीराः इयाना दधन्विरः इंद्र पिबा सुतस्य॥ अप्सु धूतस्य हरिवᳶ पिबेह नृभिस्सुत
स्य जठरं पृणस्व॥ मिमिक्षुर्यमद्रयः इंद्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः॥ प्रोग्रां पी
तिं वृष्णः इयर्मि सत्यां प्रयैस्सुतस्य हर्यश्व तुभ्यं॥ इंद्र धेनाभिरिह मादयस्व धीभिर्विश्वाभि
श्शच्या गृणानः॥ ऊती शचीवस्तव वीर्येण वयो दधानाः उशिजः ऋतज्ञाः॥ प्रजा

वरिंद्रमनुघोषोदुगो णेतरुग्रुर्गृणंतस्सधमाद्यासः॥ प्रणीतिभिष्टेहर्यश्व सुष्टोः सुषुम्नस्य
पुरुरुचोजनासः॥ मंहिष्ठामूतिंवितिरेदधानास्तोतारऽइंद्रतववेसूनृताभिः॥२४॥उ
पब्रह्माणिहरिवोहरिभ्यांसोमस्ययाहिपीतयेसुतस्य॥ इंद्रत्वायज्ञःक्षममाणमान
ड्दाश्वाँऽअस्यध्वरस्यप्रकेतः॥ सहस्त्वेवाजमभिमातिषाहंसुतेरणंमघवानंसुवृक्तिं॥उ
पभूषंतिगिरोऽअप्रतीतमिंद्रंनमस्याजरितुःपनंत॥ सप्तापोदेवीस्सुरणाःऽअमृक्तायाः
भिस्सिंधुमतरऽइंद्रपूर्भिनत्॥ नवतिंस्रोत्यानवच स्रवंतीर्देवेभ्योगातुंमनुषेचविंदः॥ अ
पोमहीरभिशस्तेरमुंचोजागरास्वधिदेवऽएकः॥ इंद्रयास्त्वंवृत्रतूर्येचकर्थताभिर्विश्वा
युस्तन्वंपुपुष्याः॥ वीरेण्यःक्रतुरिंद्रःसुशस्तिरुतापिधेनापुरुहूतमीट्टे॥ आर्दयवृ
त्रमकृणोदुलोकंससाहेशक्रःपृतनाऽअभिष्टिः॥ शुनंहुवेम०॥२५॥ कदावसोस्तो

सं॰ अ॰
८ ३

ता१

त्रं हर्यतऽ आ व श्मशा रुधद्वाः॥ दीर्घं सुतं वाताप्याय॥ हरी यस्य सुयुजा विव्रता वेरर्वंतानु
शेपा॥ उभा रजी न केशिना पतिर्दन्॥ अप योरिंद्रः पापजऽ आ मर्त्तो न शश्रमाणो बिभी
वान्॥ शुभे यद्युयुजे तविषीवान्॥ सचायोरिंद्रश्चर्कृषऽ आँऽ उपानस्सपर्यन्॥ नद
योर्विव्रतयोः शूरऽ इंद्रः॥ अधि यस्तस्थौ केशवंता व्यचस्वंता न पुष्ट्यै॥ वनोति शिप्राभ्यां
शिप्रिणीवान्॥ २८॥ प्रास्तौदृष्वौजाऽ ऋष्वेभिस्ततक्ष शूरश्शवसा॥ ऋभुर्न क्रतुभिर्मात
रिश्वा॥ वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान्॥ अरुत्तहनुरद्भुतं न रजः॥ऽ अ
व नो वृजिना शिशीह्यृचा वनेमानृचः॥ नाब्रह्मा यज्ञऽ ऋधग्जोषति त्वे॥ ऊर्ध्वा यत्ते
त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन्॥ सजूर्नावं स्वयशसं सचायोः॥ श्रिये ते पृश्निरुपसेच
नी भूच्छ्रिये दर्विररेपाः॥ यया स्वे पात्रे सिंचसऽ उत्॥ शतं वा यदसुर्य प्रति त्वा सुमि

॥ श्रम ॥
॥ ५३ ॥
शिव

त्रःऽदुस्यास्तौदुर्मित्रऽदुस्यास्तौत्॥ आवोयदस्युहत्ये कुत्सपुत्रं प्रावोयदस्युहत्ये कुत्सव
त्सं॥२१॥ ऽइति अष्टमाष्टके पंचमोध्यायः ५ ऽॐऽ उभाऽउनूनं तदिदर्थयेथे वितन्वा
थे धियो वस्त्रापसेव॥ सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्षऽआतंसयेथे॥ उष्टारे
व फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुरेथः॥ दूतेव हि ष्ठो यशसा जनेषु मापस्थातम
हिषेवावपानात्॥ साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरागमिष्टं॥ अग्निरिव
देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा॥ आपी वोऽअस्मे पितरेव पुत्रोग्रेव
रुचा नृपतीव तुर्यै॥ इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमागमिष्टं॥ वंसगेव
पूषर्या शिंबाता मित्रेवऽऋता शतरा शातपंता॥ वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवे
षा सपर्या३ पुरीषा १॥ सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका॥ उ

सं॰ अ॰
अ॰ ५॰
[illegible]

रा॰ १

दन्यजेव जेमना मदेरू तामे जराय्वजरं मरायु ॥ पज्रेव चर्चरं जारं मरायु क्षद्मेवार्थे
षु तर्त्तरीथऽ उग्रा ॥ ऋभू नापत्खरमज्रा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयीणां ॥ घर्मे
व मधु जठरे सनेरू भगेविता तुर्फरी फारिवारं ॥ पतरेव चचरा चंद्रनिर्णिङ्मनऽ ऋंगा म
नन्या न जग्मी ॥ बृहंतेव गंभरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ॥ कर्णेव शासुरनु हि
स्मराथोंशेव नो भजतं चित्रमप्नः ॥ आरंगरेव मध्वेरयेथे सारघेव गवि नीचीनबारे ॥ कीना
रेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे ॥ ऋध्याम स्तोमं सनुयाम वाजमा नो
मंत्रं सरथेहोपयातं ॥ यशो न पक्वं मधु गोष्वंतरा भूतांशोऽ अश्विनोᳵ कामम प्राः ॥ खि
ल ॥ हविर्भिरेके स्वरितस्सचंते सुन्वंतऽ एके सवनेषु सोमान् शचीर्मदंतऽ उत दक्षिणाभि
र्नेज्जिह्मायंतो नरकं पताम ॥ २ ॥ आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निर

राम
७५

मोचि॥ महि ज्योतिᳶ पितृभिर्दत्तमागादुरुᳶ पंथा दक्षिणाया ऽ अदर्शि॥ उच्चा दिवि द
क्षिणावंतो ऽ अस्थुर्ये ऽ अश्वदास्सह ते सूर्येण॥ हिरण्यदा ऽ अमृतत्वं भजंते वासोदास्सो
मप्रतिरंत ऽ आयुः॥ दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो न हि ते पृणंति॥ अथा
नरᳶ प्रयतदक्षिणासोवद्यभिया बहवᳶ पृणंति॥ शतधारं वायुमर्कं स्वर्विदं नृच
क्षसस्ते ऽ अभिचक्षते हविः॥ ये पृणंति प्र च यच्छंति संगमे ते दक्षिणां दुहते सप्तमात
रं॥ दक्षिणावान्प्रथमो हूत ऽ एति दक्षिणावान्ग्रामणीरग्रमेति॥ तमेव मन्ये नृप
तिं जनानां यᳶ प्रथमो दक्षिणामाविवाय॥ ३॥ तमेव ऽ ऋषिं तमु ब्रह्माणमाहुर्यज्ञ
न्यं सामगामुक्थशासं॥ स शुक्रस्य तन्वो वेद तिस्रो यᳶ प्रथमो दक्षिणया रराध॥ दक्षि
णाश्वं दक्षिणा गां ददाति दक्षिणा चंद्रमुत यद्धिरण्यं॥ दक्षिणान्नं वनुते यो न ऽ आ

सं. अ॰
५५

त्मादक्षिणांवर्मकृणुतेविजानन्॥ नाभोजामम्रुर्नन्यर्थमीयुर्नरिष्यंतिनव्यथंतेहभोजाः॥
इदंयद्विश्वंभुवनंस्वश्चैतत्सर्वंदक्षिणैभ्योददाति॥ भोजाजिग्युस्सुरभिंयोनिमग्रेभोजा
जिग्युर्वध्वं१यासुवासाः॥ भोजाजिग्युरंतᳶपेयंसुरायाभोजाजिग्युर्येऽअहूताᳶप्रयं
ति॥ भोजायाश्वंसंमृजंत्याशुंभोजायास्तेकन्या३शुंभमाना॥ भोजस्येदंपुष्करिणीववेश्मप
रिष्कृतंदेवमानेवचित्रं॥ भोजमश्वास्सुष्ठुवाहोवहंतिसुवृद्रथोवर्त्ततेदक्षिणायाः॥ भोजं
देवासोवताभरेषुभोजश्शत्रून्त्समनीकेषुजेता॥ ४ किमिच्छंतीसरमाप्रेदमानड्दूरेह्य
ध्वाजगुरिᳶपराचैः॥ कास्मेहितिᳶकापरितक्म्यासीत्कथंरसायाऽअतरᳶपयांसि॥ इं
द्रस्यदूतीरिषिताचरामिमहऽइच्छंतीपणयोनिधीन्वः॥ अतिष्कदोभियसातन्नऽआ
वत्तथारसायाऽअतरंपयांसि॥ कीदृङ्ङिंद्रस्सरमेकादृशीकायस्येदंदूतीरसरᳶपरा

एम
५५

कात्॥ आचगच्छान्मित्रमेनाद धामाथागवांगोपतिर्नोभवाति॥ नाहंतंवेददभ्यंदभ
त्सयस्येदंदूतीरसरंपराकात्॥ नतंगूहंतिस्रवतोगभीरा हताऽ इंद्रेणपणयश्शयध्वे
॥इमागावस्सरमेयाऽ ऐच्छः परिदिवोऽ अंतान्त्सुभगेपतंती॥ कस्तऽ एनाऽ अवसृजाद
युध्व्युतास्माकमायुधासंतितिग्मा॥५॥ असेन्यावः पणयोवचांस्य निषव्यास्तन्व
स्संतुपापीः॥ अधृष्टोवऽ एतवाऽ अस्तुपंथाबृहस्पतिर्व उभयानमृळात्॥ अयंनि
धिस्सरमेऽ अद्रिबुध्नोगोभिरश्वेभिर्वसुभिर्न्यृष्टः॥ रक्षंतितंपणयोयेसुगोपारेकु
पदमलकमाजगंथ॥ एहगमन्नृषयस्सोमशिताः अयास्योऽ अंगिरसोनवग्वाः
॥तऽ एतमूर्वंविभजंतगोनामथैतद्वचः पणयोवमन्नित्॥ एवाचत्वंसरमआजगं
थप्रबाधितासहसादैव्येन॥ स्वसारंत्वाकृणवैमापुनर्गाऽ अपतेगवांसुभगेभजा

म॥ नाहंवेदभ्रातृत्वंनोस्वसृत्वमिंद्रोविदुरंगिरसश्चघोराः॥ गोकामामे ऽ अछदयन्
यदायमपात्त ऽ इतपणयोवरीयः॥ दूरमितपणयोवरीय ऽ उद्गावोयंतुमिनतीः ऽ ऋ
तेन॥ बृहस्पतिर्या ऽ अविंदन्निगूल्हास्सोमोग्रावाण ऽ ऋषयश्चविप्राः॥ ६॥ तेव
दन्प्रथमाब्रह्मकिल्बिषेकूपारस्सलिलोमातरिश्वा॥ वीलुहरास्तप ऽ उग्रोमयोभू
रापोदेवीः ऽ प्रथमजा ऽ ऋतेन॥ सोमोराजाप्रथमोब्रह्मजायांपुनः ऽ प्रायछदहृणी
यमानः॥ अन्ववर्तितावरुणोमित्र ऽ आसीदग्निर्होताहस्तगृह्यानिनाय॥ हस्तेनैवग्रा
ह्य ऽ आधिरस्याब्रह्मजायेयमितिचेदवोचन्॥ नदूतायप्रह्येतस्थ ऽ एषातथाराष्ट्रं
गुपितंक्षत्रियस्य॥ देवा ऽ एतस्यामवदंतपूर्वेसप्त ऽ ऋषयस्तपसेयेनिषेदुः॥ भी
माजायाब्राह्मणस्योपनीतादुर्धांदधातिपरमेव्योमन्॥ ब्रह्मचारीचरतिवेविष

द्विषस्स्वर्देवानांभवस्येकमंगं।।तेनजायामन्वविंदद्बृहस्प तिस्सोमेननीतांजुह्वं१नदे
वाः।।पुनर्वैदेवाऽअददुᳶपुनर्मनुष्याऽउत।।राजानस्सत्यंकृण्वानाब्रह्मजायांपुनर्द
दुः।।पुनर्दायब्रह्मजायांकृत्वीदेवैर्निकिल्बिषं।।ऊर्जंपृथिव्याभक्त्वायोरुगायमुपा
सते।।७।।समिद्धोऽअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवेदः।।आचवहमित्रम
हश्चिकित्वान्त्वंदूतᳵकविरसिप्रचेताः।।तनूनपात्पथऽऋतस्ययानान्मध्वासमंजन्स्व
दयासुजिह्व।।मन्मानिधीभिरुतयज्ञमृंधन्देवत्राचकृणुह्यध्वरंनः।।आजुह्वानऽई
ड्योवंद्यश्चायाह्यग्नेवसुभिस्सजोषाः।।त्वंदेवानामसियह्वहोतासऽएनान्यक्षी
षितोयजीयान्।।प्राचीनंबर्हिᳶप्रदिशापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नां
।।व्युप्रथतेवितरंवरीयोदेवेभ्योऽअदितयेस्योनं।।व्यचस्वतीरुर्वियाविश्रयंतांप

तिभ्यो न जंयश्शुंभमानाः॥ देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः॥ आ
आ सुष्वयंती यजतेऽउपाकेऽउषासानक्ता सदतां नियोनौ॥ दिव्ये योषणे बृहती सुरु
क्मेऽअधि श्रियं शुक्रपिशं दधाने॥ दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो
यजध्यै॥ प्रचोदयंता विदथेषु कारू प्राचीनं ज्योतिᳶ प्रदिशा दिशंता॥ आ नो यज्ञं भार
ती तूयमेत्विळा मनुष्वदिह चेतयंती॥ तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसस्सदं
तु॥ यऽइमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा॥ तमद्य होतरिषितो यजी
यान्देवं त्वष्टारमिह यक्षि विद्वान्॥ उपावसृज त्मन्या समंजन्देवानां पाथऽ ऋतुथा हवी
षि॥ वनस्पतिः शमिता देवोऽअग्निः स्वदंतु हव्यं मधुना घृतेन॥ सद्यो जातो व्यमिमीत य
ज्ञमग्निर्देवानामभवत्पुरोगाः॥ अस्य होतुᳶ प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदंतु देवाः

॥९॥ मनीषिणᳶ प्रभरध्वं मनीषां यथायथा मतयस्संति नृणां॥ इंद्रं सत्यैरेरयामाकृ
तेभिस्स हि वीरो गिर्वणस्युर्विदानः॥ ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो
गोभिरानट्॥ उदतिष्ठत्तविषेणा रवेण महांति चित्संविव्याचा रजांसि॥ इंद्रᳵ किल श्रु
त्याऽअस्य वेद स हि जिष्णुᳶ पथिकृत्सूर्याय॥ आन्मेनां कृण्वन्नच्युतो भुवद्गोᳶ पतिर्दि
वस्सनजाऽअप्रतीतः॥ इंद्रो मह्ना महतोऽअर्णवस्य व्रतामिनादंगिरोभिर्गृणानः॥ पु
रूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता॥ इंद्रो दिवᳶ प्रतिमानं पृथिव्या
विश्वा वेद सवना हंति शुष्णं॥ महीं चिद्द्यामातनोत्सूर्येण चास्कंभ चित्कंभनेन स्कभीया
न्॥१०॥ वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः॥ वि धृष्णोऽअत्र धृष
ता जघंथाथाभवो मघवन्बाह्वोजाः॥ सचंत यदुषसस्सूर्येण चित्रामस्य केतवो रामविं

दन्॥ आयन्नक्षत्रंददृशेद्दिवोनपुनर्यतोनकिरद्धानुवेद॥ दूरंकिलप्रथमाजग्मुरासा
मिंद्रस्ययाᳶप्रसवेसस्रुरापः॥ क्वस्विदग्रंक्वबुध्नऽआसामापोमध्यंक्ववोनूनमंतः॥
सृजस्सिंधूँरहिनाजग्रसानाँऽआदिदेताᳶप्रविविज्रेजवेन॥ मुमुक्षमाणाऽउतयामु
मुच्रेधेदेतानरमंतेनितिक्ताः॥ सध्रीचीस्सिंधुमुशतीरिवायन्त्सनाज्जारऽआरितᳶपू
र्भिदासां॥ अस्तमातेपार्थिवावसून्यस्मेजग्मुस्सूनृताऽइंद्रपूर्वीः॥ ११॥ इंद्रपिबप्रति
कामंसुतस्यप्रातस्सावस्तवहिपूर्वपीतिः॥ हर्षस्वहंतवेशूरशत्रूनुक्थेभिष्टेवीर्या३प्र
ब्रवाम॥ यस्तेरथोमनसोजवीयानेंद्रतेनसोमपेयाययाहि॥ तूयमातेहरयᳶप्रद्र
वंतुयेभिर्यासिवृषभिर्मंदमानः॥ हरित्वतावर्चसूर्यस्यश्रेष्ठैरूपैस्तन्वंस्पर्शयस्व
॥ अस्माभिरिंद्रसखिभिर्हुवानस्सध्रीचीनोमादयस्वानिषद्य॥ यस्यत्यत्तेमहिमानंम
सा

देधिमे मही रोदसी नाविविक्तां॥ नरोक ऽ आ हरिभिरिंद्र युक्तैः प्रियेभिर्याहि प्रियमन्नम
छ॥ यस्य शश्वसपिवाँ ऽ इंद्र शत्रूननानुकृसारण्या चकर्थ॥ सते पुरंधिं तविषीमियर्त्ति
सते मदाय सुत ऽ इंद्र सोमः॥ २॥ इदंते पात्रं सनवित्तमिंद्र पिबा सोममेना शतक्रतो ॥ पू
र्णऽ आहावो मदिरस्य मध्वो यं विश्व ऽ इदभिहर्यंति देवाः॥ विहित्वामिंद्र पुरुधा जनासो
हितप्रयसो वृषभ ह्वयंते॥ अस्माकंते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य॥ प्रत ऽ
इंद्र पूर्व्याणि प्रनूनं वीर्या वोचं प्रथमा कृतानि॥ सतीनमन्युरश्रथायो ऽ अद्रिं सुवेदना
मकृणो ब्रह्मणे गां॥ निषु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां॥ न ऽ ऋते त्व
त्क्रियते किंचनारे महामर्कं मघवन् चित्रमर्च॥ अभिख्यानो मघवन्नाधमानान्त्सखे
बोधि वसुपते सखीनां॥ रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदाभजा राये ऽ अस्मान्

सं॰अ॰
५९

॥२३॥ ऽअनुवाकः॥ तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनुशुष्ममावतां॥ यदै
त्कृण्वानो महिमानमिंद्रियं पीत्वी सोमस्य क्रतुमाँऽ अवर्धत॥ तमस्य विष्णुर्महिमानमो
जसांशुं दधन्वान्मधुनो विरप्शते॥ देवेभिरिंद्रो मघवा सयावभिर्वृत्रं जघन्वाँऽ अभवद्व
रेण्यः॥ वृत्रेणा यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे॥ विश्वे तेऽ अत्र म
रुतस्सह त्मनावर्धन्नुग्र महिमानमिंद्रियं॥ जज्ञानऽ एव व्यबाधत स्पृधᳶ प्रापश्य
द्वीरोऽ अभि पौंस्यं रणं॥ अवृश्चदद्रिवमसस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुं॥
आदिंद्रस्सत्रा तविषीरपत्यत वरीयो द्यावापृथिवीऽ अबाधत॥ अवाभरद्धृषितो वज्रमा
यसं शेवं मित्राय वरुणाय दाशुषे॥१४॥ इंद्रस्यात्र तविषीभ्यो विरप्शिनऽ ऋघायतो
ऽअरंहयंत मन्यवे॥ वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतं॥ या वीर्या

एम
५९

णिप्रथमानिकर्त्वामहित्वेभिर्यतिमानौसमीयतुः ॥ ध्वांतंतमोवदध्वसेहतऽइंद्रोमह्ना
पूर्वहूतावपत्यत ॥ विश्वेदेवासोऽअधवृष्ण्यानितेवर्धयन्त्सोमवत्यावचस्यया ॥ रद्धंवृत्र
महिमिंद्रस्यहन्मनाग्निर्नजंभैस्तृष्वन्नमावयत् ॥ भूरिदक्षेभिर्वचनेभिःऽऋक्वभिःसख्ये
भिःसख्यानिप्रवोचत ॥ इंद्रोधुनिंचचुमुरिंचदंभयञ्छ्रद्धामनस्याशृणुतेदभीतये ॥ त्वंपु
रूण्याभरास्वश्व्यायेभिर्मंसैनिवचनानिशंसन् ॥ सुगेभिर्विश्वादुरितातरेमविदोषुण
ऽउर्वियागाधमद्य ॥ १५ ॥ घर्मासमंतात्रिवृतंव्यापतुस्तयोर्जुष्टिंमातरिश्वाजगाम ॥
दिवस्पयोदिधिषाणाऽअवेषन्विदुर्देवाःसहसामानमर्कं ॥ तिस्रोदेष्ट्रायनिःऋती
रुपासतेदीर्घश्रुतोविहिजानंतिवह्नयः ॥ तासांनिचिक्युःकवयोनिदानंपरेषुयागुह्ये
षुव्रतेषु ॥ चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते ॥ तस्यांसुपर्णावृष

सं॰अ॰
६०

णानिषेदतुर्यत्रदेवादधिरेभागधेयं॥ एकस्सुपर्णस्ससमुद्रमाविवेश सऽइदंविश्वं
भुवनंविचष्टे॥ तंपाकेनमनसापश्यमंतितस्तंमातारेळ्हिसऽउरेळ्हिमातरं॥ सुपर्णं
विप्राःकवयोवचोभिरेकंसंतंबहुधाकल्पयंति॥ छंदांसिचदधतोऽअध्वरेषुग्रहान्सो
मस्यमिमतेद्वादश॥२६॥ षट्त्रिंशांश्चचतुरःकल्पयंतश्छंदांसिचदधतऽआद्वादशं॥
यज्ञंविमायकवयोमनीषऽऋक्सामाभ्यांप्ररथंवर्त्तयंति॥ चतुर्दशान्येमहिमानोऽअ
स्यतंधीरावाचाप्रणयंतिसप्त॥ आप्नानंतीर्थंकऽइहप्रवोचद्येनपथाप्रपिबंतेसुतस्य
॥ सहस्रधापंचदशान्युक्थायावद्यावापृथिवीतावदित्तत्॥ सहस्रधामहिमानस्सहस्रं
यावद्ब्रह्मविष्ठितंतावतीवाक्॥ कश्छंदसांयोगमावेदधीरः कोधिष्ण्यांप्रतिवाचंपपाद
॥ कमृत्विजामष्टमंशूरमाहुर्हरीइंद्रस्यनिचिकायकस्वित्॥ भूम्याऽअंतंपर्येकेच

एम
६०

रंतिर्यस्य धूर्षु युक्तासो ऽ अश्वः॥ अमस्वदायं विभजंस्येभ्यो यद्दायमो भवति हर्म्यें हितः॥ १७॥
चित्र ऽ इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे॥ अनूधा यदि जीजनदधा च नु
ववक्ष सद्यो महि दूत्यं१ चरन्॥ अग्निर्ह नाम धायि दन्नपस्तमः सं यो वना युवते भस्मना द
ता॥ अभिप्रमुरा जुह्वा स्वध्वर ऽ इनो न प्रोथमानो यवसे वृषा॥ तं वो विं न द्रुषदं देवमंधस ऽ
इंदुं प्रोथंतं प्रवपंतमर्णवं॥ आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजंतमध्वनः॥ वि र
यस्य ते ज्रयसानस्याजर धक्षोर्न वाताᳶ परि संत्यच्युताः॥ आ रण्वासो युयुधयो न सत्व
नं त्रितं नशंत प्रशिषंत ऽ इष्टये॥ स ऽ इदग्निᳵ कण्वतमᳵ कण्वसखार्यᳶ परस्यांतर
स्य तरुषः॥ अग्निᳶ पातु गृणतो ऽ अग्निः सूरीनग्निर्ददातु तेषामवो नः॥ १८॥ वाजिन्त
माय सह्यसे सुपित्र्य तृषुच्यवानो ऽ अनु जातवेदसे॥ अनुद्रे चिद्यो धृषता वरं सते हिंमे

न्तंमायु धन्वनेद्दविष्यते॥ एवाग्निर्मर्तैस्सहसूरिभिर्वसुष्टवे सहसस्सूनरोन्नृभिः॥मि
त्रासोनयेसुधिताऽऋतायवोद्यावोनद्युम्नैरभिसंतिमानुषान्॥ ऊर्जोनपात्सहसावन्नि
तित्वोपस्तुतस्यवंदतेवृषावाक्॥ त्वांस्तोषामत्वयासुवीराद्राघीयऽआयुः प्रतरंदधाना
ः॥ इतित्वाग्नेवृष्टिहव्यस्यपुत्राऽउपस्तुतासऽऋषयोवोचन्॥ तांश्चपाहिगृणतश्चसूरी
न्वषड्वषडित्यूर्ध्वासोऽअनक्षन्नमोनमऽइत्यूर्ध्वासोऽअनक्षन्॥२९॥ पिबासोमंमहत
ऽइंद्रियायपिबावृत्रायहंतवेशविष्ठ॥ पिबरायेशवसेहूयमानः पिबमध्वस्तृपदिंद्रावृ
षस्व॥ अस्यपिबक्षुमतः प्रस्थितस्येंद्रसोमस्यवरमासुतस्य॥ स्वस्तिदामनसामादय
स्वार्वाचीनोरेवतेसौभगाय॥ ममत्तुत्वादिव्यस्सोमऽइंद्रममत्तुयस्सूयतेपार्थिवेषु॥ मम
त्तुयेनवरिवश्चकर्थममत्तुयेननिरिणासिशत्रून्॥ आद्विबर्हाऽअमिनोयात्विंद्रोवृषा

हरिभ्यांपरिषिक्तमंधः॥ गव्यासुतस्यप्रभृतस्यमध्वःसत्राखेदामरुशहावृषस्व॥ तितिग्मा
निभ्राष्टयन्भ्राष्ट्यान्यवस्थिरातनुहियातुजूनां॥ उग्रायतेसहोबलंददाभिप्रतीत्याशत्रू
न्विगदेषुवृश्च॥२०॥ व्यर्यइंद्रतनुहिश्रवांस्योजःस्थिरेवधन्वनोभिमातीः॥ अस्मद्र्य
ग्वावृधानस्सहोभिरनिभृष्टस्तन्वंवावृधस्व॥ इदंहविर्मघवन्तुभ्यंरातंप्रतिसम्राळहृणा
नोगृभाय॥ तुभ्यंसुतोमघवन्तुभ्यंपक्वोऽद्धींद्रपिबप्रस्थितस्य॥ अद्धीदिंद्रप्रस्थितेमाह
वींषिचनोदधिष्वपचतोतसोमं॥ प्रयस्वंतःप्रतिहर्यामसित्वासत्याःसंतुयजमानस्यकामा
ः॥ प्रेंद्राग्निभ्यांसुवचस्यामियर्मिसिंधाविवप्रेरयंनावमर्कैः॥ अयाऽइवपरिचरंतिदेवाये
ऽअस्मभ्यंधनदाऽउद्भिदश्च॥२१॥ नवाऽउदेवाःक्षुधमिद्वधंददुरुताशितमुपगच्छंतिमृ
त्यवः॥ उतोरयिःपृणतोनोपदस्यत्युतापृणन्मर्डितारंनविंदते॥ यआध्रायचकमा

नायपित्वोन्नवान्त्सन्रफितायोपजग्मुषे॥ स्थिरंमनः॑कृणुतेसेवतेपुरो तोचित्सम
र्डितारंनविंदते॥ सऽइद्भोजोयोगृहवेददात्यन्नकामायचरतेकृशाय॥ अरमस्मैभवतियाम
हूताऽउतापरीषुकृणुतेसखायं॥ नससखायोनददातिसख्येसचाभुवेसचमानाय
पित्वः॥ अपास्मात्प्रेयान्नतदोकोऽअस्तिपृणंतमन्यमरणंचिदिच्छेत्॥ पृणीयादिन्ना
धमानायतव्यान्द्राघीयांसमनुपश्येतपंथां॥ ओहिवर्त्तंतेरथ्येवचक्रान्यमन्यमुपतिष्ठं
तरायः॥२२॥ मोघमन्नंविंदतेऽअप्रचेताःसत्यंब्रवीमिवधऽइत्सतस्य॥ नार्यमणंपु
ष्यतिनोसखायंकेवलाघोभवतिकेवलादी॥ कृषन्नित्फालऽआशितंकृणोतियन्नध्वा
नमपवृंक्तेचरित्रैः॥ वदन्ब्रह्मावदतोवनीयान्पृणन्नापिरपृणंतमभिष्यात्॥ एक
पाद्भूयोद्विपदोविचक्रमेद्विपात्त्रिपादमभ्येतिपश्चात्॥ चतुष्पादेतिद्विपदामभिस्वरे

संपश्यन्पंक्तीरुपतिष्ठमानः॥ समौचिद्धस्तौनसमंविविष्टः संमातराचिन्नसमंदुहाते॥
यमयोश्चिन्नसमावीर्याणिज्ञातीचित्संतौनसमंपृणीतः॥२३॥ अग्नेहंसिन्यत्रिणं
दीद्यन्मर्त्येष्वा॥ स्वेक्षयेशुचिव्रत॥ उत्तिष्ठसिस्वाहुतोघृतानिप्रतिमोदसे॥ यत्त्वास्रुच
स्समस्थिरन्॥ सऽआहुतोविरोचतेग्निरीळेन्योगिरा॥ स्रुचाप्रतीकमज्यते॥ घृतेनाग्नि
स्समज्यतेमधुप्रतीकऽआहुतः॥ रोचमानोविभावसुः॥ जरमाणस्समिध्यसेदेवेभ्योह
व्यवाहन ॥ तंत्वाहवंतमर्त्याः॥२४॥ तंमर्त्ताऽअमर्त्यं घृतेनाग्निंसपर्यत॥ अदाभ्यंगृह
पतिं॥ अदाभ्येनशोचिषाग्नेरक्षस्त्वंदह॥ गोपाऽऋतस्यदीदिहि॥ सत्वमग्नेप्रतीकेनप्र
त्योषयातुधान्यः॥ उरुक्षयेषुदीद्यत्॥ तंत्वागीर्भिरुरुक्षयाहव्यवाहंसमीधिरे॥ यजि
ष्ठंमानुषेजने॥२५॥ इतिवाऽइतिमेमनोगामश्वंसनुयामिति॥ कुवित्सोमस्यापामिति॥

सं॰अ॰ प्रवाताऽइवदोधतऽउन्मापीताऽअयंसत॥ कुवि॰॥ उन्मापीताऽअयंसतरथमश्वाऽइवा
६३ शवः॥ कुवि॰॥ उपमामतिरस्थितवाश्रापुत्रमिवप्रियं॥ कुवि॰॥ अहंतष्टेववंधुरंपर्यचामि
हृदामतिं॥ कुवि॰॥ नहिमेऽअक्षिपच्चनाछान्त्सुःपंचकृष्टयः॥ कुवि॰॥२६॥ नहिमेरोद
सीऽउभेऽअन्यंपक्षंचनप्रति॥ कुवि॰॥ अभिद्यांमहिनाभुवमभीऽइमांपृथिवीमही॥ कुवि॰
॥ हंताहंपृथिवीमिमांनिदधानीहवेहवा॥ कुवि॰॥ ओषमित्पृथिवीमहंजंघनानीहवेहवा
॥ कुवि॰॥ दिविमेऽअन्यःपक्षोऽधोऽअन्यमचीकृषं॥ कुवि॰॥ अहमस्मिमहामहोभिन
भ्यमुदीषितः॥ कुवि॰॥ गृहोयाम्यरंकृतोदेवेभ्योहव्यवाहनः॥ कुवि॰॥२७॥ ऽइतिअष्टमा
ष्टकेषष्ठोध्यायः॥६॥ ऽॐ३म॥ तदिदासभुवनेषुज्येष्ठंयतोजज्ञऽउग्रस्त्वेषनृम्णः राम
॥ सद्योजज्ञानोनिरिणातिशत्रूननुयंविश्वेमदंत्यूमाः॥ वावृधानशवसाभूर्योजाःशत्र ६३

त्रुर्दासायभियसंदधाति॥ अव्यनच्चव्यनच्चसस्निसंतेनवंतप्रभृतामदेषु॥ त्वेक्रतुमपि
वृंजंतिविश्वेद्विर्यदेतेत्रिर्भवंत्यूमाः॥ स्वादोस्स्वादीयस्स्वादुनासृजासमदस्सुमधुमधुना
भियोधीः॥ इतिचिद्धित्वाधनाजयंतंमदेमदेऽअनुमदंतिविप्राः॥ ओजीयोधृष्णोस्थिरमा
तनुष्वमात्वादभन्यातुधानादुरेवाः॥ त्वयावयंशाशद्महेरणेषुप्रपश्यंतोयुधेन्यानि
भूरि॥ चोदयामितऽआयुधावचोभिस्संतेशिशामिब्रह्मणावयांसि॥१॥ स्तुषेय्यंपु
रुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानां॥ आदर्षतेशवसासप्तदानून्प्रसाक्षतेप्रतिमा
नानिभूरि॥ नितद्दधिषेवरंपरंयस्मिन्नाविथावसादुरोणे॥ आमातरास्थापयसेजिग
त्नूऽअतऽइनोषिकर्वरापुरूणि॥ इमाब्रह्मबृहद्दिवोविवक्तींद्रायशूषमग्रियस्स्वर्षाः
॥ महोगोत्रस्यक्षयतिस्वराजोदुरश्चविश्वाऽअवृणोदपस्वाः॥ एवामहान्बृहद्दिवोऽअ

सं॰अ॰
६४

थर्वावोचुत्स्वां तन्वंशुमिंद्रमेव॥ स्वसारो मातरिभ्वरीररिप्राहिन्वंतिच्च शवसावर्धयंतिच्च २
॥ हिरण्यगर्भस्समवर्त्तताग्नेभूतस्यजातᳶ पतिरेकऽआसीत्॥ सदाधार पृथिवीं द्यामु
तेमां कस्मै देवाय हविषा विधेम॥ यऽआत्मदा बलदा यस्य विश्वऽउपासते प्रशिषं यस्य
देवाः॥ यस्य छायामृतं यस्य मृत्युᳵ कस्मै०॥ यᳶ प्राणतो निमिषतो महित्वैकऽइद्राजा
जगतो बभूव॥ यऽईशेऽअस्य द्विपदश्चतुष्पदᳵ कस्मै०॥ यस्येमे हिमवंतो महित्वा यस्य
समुद्रं रसया सहाहुः॥ यस्येमाᳶ प्रदिशो यस्य बाहू कस्मै०॥ येन द्यौरुग्रा पृथिवी च दृळ्हा येन
स्वस्स्तभितं येन नाकः॥ योऽअंतरिक्षे रजसो विमानᳵ कस्मै०॥ ३॥ यं क्रंदसीऽअवसात
स्तभानेऽअभ्यैक्षेतां मनसा रेजमाने॥ यत्राधि सूरऽउदितो विभाति कस्मै०॥ आपो ह य
द्बृहतीर्विश्वमायन्गर्भंदधाना जनयंतीरग्निं॥ ततो देवानां समवर्त्ततासुरेकᳵ कस्मै०॥

राम
६४

यश्चिदापोमहिनापर्यपश्यद्दक्षंदधानाजनयंतीर्यज्ञं॥ योदेवेष्वधिदेवऽएकऽआ
सीत्कस्मै॰॥ मानोहिंसीज्जनितायःपृथिव्यायोवादिवंसत्यधर्माजजान॥ यश्चापश्चं
द्राबृहतीर्जजानकस्मै॰॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥ यत्का
मास्तेजुहुमस्तन्नोऽअस्तुवयंस्यामपतयोरयीणां॥४॥ वसुंनचित्रमहसंगृणीषेवामं
शेवमतिथिमद्विषेण्यं॥ सरासतेशुरुधोविश्वधायसोग्निर्होतागृहपतिस्सुवीर्यं॥ जुषा
णोऽअग्नेप्रतिहर्यमेवचोविश्वानिविद्वान्वयुनानिसुक्रतो॥ घृतनिर्णिग्ब्रह्मणेगा
तुमेरयतवदेवाऽअजनयन्ननुव्रतं॥ सप्तधामानिपरियन्नमर्त्योदाशद्दाशुषेसुकृते
मामहस्व॥ सुवीरेणरयिणाग्नेस्वाभुवायस्तऽआनट्समिधातंजुषस्व॥ यज्ञस्यकेतुंप्र
थमंपुरोहितंहविष्मंतऽईळतेसप्तवाजिनं॥ शृण्वंतमग्निंघृतपृष्ठमुक्षणंतंदेवंपृण

राम

ए यं १

ते सुवीर्यं॥ त्वं दूतᳶ प्रथमो वरेण्यस्स हूयमानो ऽअमृताय मत्स्व॥ त्वां मर्जयन्मरुतो दाशु
षो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः॥ ५॥ इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमाना
य सुक्रतो॥ अग्ने घृतस्नुस्त्रिऽर्ऋतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे॥ त्वामिदस्या ऽउष
सो व्युष्टिषु दूतं कृण्वाना ऽअयजन्त मानुषाः॥ त्वां देवा महयाय्याय वावृधुराज्यमग्ने नि
मृजन्तो ऽअध्वरे॥ नि त्वा वसिष्ठा ऽअह्वन्त वाजिनं गृणन्तो ऽअग्ने विदथेषु वेधसः॥ रायस्पो
षं यजमानेषु धारय यूयं पात स्वस्तिभिस्सदा नः॥ ६॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योति
र्जरायू रजसो विमाने॥ इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥ समुद्रादूर्मि
मुदियर्त्ति वेनो नभोजाᳶ पृष्ठं हर्यतस्य दर्शि॥ ऋतस्य सानावधि विष्टपि भ्राट् समानं यो
निमभ्यनूषत व्राः॥ समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरस्सनीळाः॥ ऋतस्य

सानावधिचक्रमाणारिहंतिमध्वौऽअमृतस्यवाणीः॥जानंतोरूपमकृपंतविप्रामृगस्य
घोषंमहिषस्यहिग्मन्॥ऋतेनयंतोऽअधिसिंधुमस्थुर्विदद्गंधर्वोऽअमृतानिनाम॥
अप्सराजारमुपसिष्मियाणायोषाबिभर्त्तिपरमेव्योमन्॥चरत्प्रियस्ययोनिषुप्रियस्सन्त्सी
दत्पक्षेहिरण्ययेसवेनः॥५॥नाकेसुपर्णमुपयत्पतंतंहृदावेनंतोऽअभ्यचक्षतत्वा॥हिर
ण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युं॥ऊर्ध्वोगंधर्वोऽअधिनाकेऽअस्थात्प्र
त्यङ्चित्राबिभ्रदस्यायुधानि॥वसानोऽअत्कंसुरभिंदृशेकंस्व१र्णनामजनतप्रियाणि॥
द्रप्सस्समुद्रमभियज्जिगातिपश्यन्गृध्रस्यचक्षसाविधर्मन्॥भानुश्शुक्रेणशोचिषाचका
नस्तृतीयेचक्रेरजसिप्रियाणि॥८॥इमंनोऽअग्नऽउपयज्ञमेहिपंचयामंत्रिवृतंसप्ततं
तुं॥असोहव्यवाळुतनᳶपुरोगाज्योगेवदीर्घंतमऽआशयिष्ठाः॥अदेवाद्देवᳶप्रच

प

ता गुहायन्प्र[illegible]मानो ऽ अमृतत्वमेमि॥ शिवंयत्संतमशिवोजहामिस्वात्सख्यादरंणींनाभि
मेमि॥ पश्यन्नन्यस्या ऽ अतिथिंवयाया ऽ ऋतस्यधामविमिमेपुरूणि॥ शंसामिपित्रे ऽ असु
राय शेवमयज्ञियाद्यज्ञियंभागमेमि॥ बह्वीस्समा ऽ अकरमंतरस्मिन्निंद्रंवृणानः पितरंज
हामि॥ अग्निस्सोमोवरुणस्तेच्यवंतेपर्यावर्द्राष्ट्रंतदवाम्यायन्॥ निर्माया ऽ उत्ये ऽ असुरा ऽ
अभूवन्त्वंचमावरुणकामयासे॥ ऋतेनराजन्ननृतंविविंचन्ममराष्ट्रस्याधिपत्यमेहि॥१॥
इदंस्वरिदमिदासवाममयंप्रकाश ऽ उर्व१ंतरिक्षं॥ हनाववृत्रंनिरेहिसोमहविष्ट्वासंतंहविषा
यजाम॥ कविः कवित्वादिविरूपमासजदप्रभूतीवरुणोनिरपस्सृजत्॥ क्षेमंकृण्वानाजन
नयोनसिंधवस्ता ऽ अस्यवर्णंशुचयोभरिभ्रति॥ ता ऽ अस्यज्येष्ठमिंद्रियंसचंतेता ऽ ईमाक्षे
तिस्वधयामदंतीः॥ ता ऽ ईंविशोनराजानंवृणानाबीभत्सुवो ऽ अपवृत्रादतिष्ठन्॥ बीभत्सू

नांसयुजंहंसमाहुरपांदिव्यानांसख्येचरंतं॥ अनुष्टुभमनुचर्चूर्यमाणमिंद्रंनिचिक्युःक
वयोमनीषा॥१०॥ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः॥ अहंमित्रावरुणोभा
विभर्म्यहमिंद्राग्नीऽअहमश्विनोभा॥ अहंसोममाहनसंविभर्म्यहंत्वष्टारमुतपूषणंभ
गं॥ अहंदधामिद्रविणंहविष्मतेसुप्राव्येऽयजमानायसुन्वते॥ अहंराष्ट्रीसंगमनीवसू
नांचिकितुषीप्रथमायज्ञियानां॥ तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंतीं
॥ मयासोऽअन्नमत्तियोविपश्यतियःप्राणितियईंशृणोत्युक्तं॥ अमंतवोमांतऽउप
क्षियंतिश्रुधिश्रुतश्रद्धिवंतेवदामि॥ अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः
॥ यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां॥११॥ अहंरुद्रायधनुरातनो
मिब्रह्मद्विषेशरवेहंतवाऽउ॥ अहंजनायसमदंकृणोम्यहंद्यावापृथिवीऽआविवेश॥

स॰अ॰ अहंसुवे पितरमस्य मूर्धन्मम योनिरप्स्वं१तस्समुद्रे॥ ततो वितिष्ठे भुवनानु विश्वोतामूं द्यां
६७ वर्ष्मणोपस्पृशामि॥ अहमेव वातऽइव प्रवाम्यारभमाणा भुवनानि विश्वा॥ परो दिवा पर
ऽएना पृथिव्यैतावती महिना संबभूव॥ २२॥ न तमंहो न दुरितं देवासोऽअष्ट मर्त्यं॥ स
जोषसो यमर्यमा मित्रो नयंति वरुणोऽअति द्विषः॥ तद्धि वयं वृणीमहे वरुण मित्रार्य
मन्॥ येनानिरंहसो यूयं पाथनेथा च मर्त्यमति द्विषः॥ ते नूनं नो यमूतये वरुणो मित्रोऽ
अर्यमा॥ नयिष्ठाऽउनो नेषणि पर्षिष्ठाऽउनः पर्षण्यति द्विषः॥ यूयं विश्वं परि पाथ
वरुणो॰॥ युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोति द्विषः॥ आदित्यासोऽअतिस्रिधो
वरुणो॰॥ उग्रं मरुद्भी रुद्रं हुवेमेंद्रमग्निं स्वस्तयेति द्विषः॥ नेतारऽऊषुणस्तिरो वरुणो॰ एम
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः॥ शुनमस्मभ्यमूतये वरुणो मि॰॥ ६७

शर्मयछंतुसप्रथः ऽ आदित्यासोयदीमहे ऽ अतिद्विषः॥ यथाहत्यद्वसवोगौर्यंचित्पदिषि
तामसुंचतायजत्राः॥ एवोष्व१स्मन्मुंचताव्यंहःᳶप्रतार्यग्नेप्रतरंनऽआयुः॥ १३॥ रात्रीव्य
ख्यदायतीपुरुत्रादेव्य१क्षभिः॥ विश्वाऽअधिश्रियोधित॥ ओर्वप्राऽअमर्त्यानिवतोदे
व्यु१द्वतः॥ ज्योतिषाबाधतेतमः॥ निरुस्वसारमस्कृतोषसंदेव्यायती॥ अपेदुहासतेतमः॥
सानोऽअद्ययस्यावयंनितेयामन्नविक्ष्महि॥ वृक्षेनवसतिंवयः॥ निग्रामासोअविक्षत
निपद्वंतोनिपक्षिणः॥ निश्येनासश्चिदर्थिनः॥ यावयावृक्यं१वृकंयवयस्तेनमूर्म्ये॥
अथानःसुतराभव॥ उपमापेपिशत्तमःᳵकृष्णंव्यक्तमस्थित॥ उषऽऋणेवयातय॥
उपतेगाऽइवाकरंवृणीष्वदुहितर्दिवः॥ रात्रिस्तोमंनजिग्युषे॥ १७॥ परिशिष्टं॥ आरा
त्रिपार्थिवंरजःᳶपितुरप्रा.यिधामभिः॥ दिवस्सदांसिबृहतीवितिष्ठसऽआत्वेषंवर्तते

सप्त

तमेः॥ ये तेरात्रीन्नचक्षसोयुक्तासो नवतिर्नवे॥ अशीतिस्संत्वष्टाऽउतोतेसप्ततीः॥ रात्रीं प्रपद्ये
जननीं सर्वभूतनिवेशनीं॥ भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशां॥ संवेशनीं संयमनीं
ग्रहनक्षत्रमालिनीं॥ प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि भद्रे पारमशीमह्योन्नमः
॥ स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियां॥ सहस्रसंमितां दुर्गां जातवेदसे सुनवा
म सोमं॥ शांत्यर्थं तद्द्विजातीनामृषिभिस्सोमपाश्रिताः॥ ऋग्वेदे त्वं समुत्पन्ना रातीयतो
निर्दहाति वेदः॥ ये त्वां देवि प्रपद्यंति ब्राह्मणा हव्यवाहनी॥ अविद्या बहुविद्या वा सनः पर्ष
दति दुर्गाणि विश्वा॥ येऽग्निवर्णां शुभां सौम्यां कीर्त्तयिष्यंति ये द्विजाः॥ तां तारयति दु
र्गाणि नावेव सिंधुं दुरितात्यग्निः॥ दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे॥ अग्निचोरनि
पाते षु दुष्टग्रणनिवारणे॥ दुर्गेषु विषमेषु त्वं संग्रामेषु वनेषु च॥ मोहयित्वा प्रप

यंतेतेषांमेऽअभयंकुरुत्तेषांमेऽअभयंकुर्वीन्नमः॥ केशिनींसर्वभूतानांपंचमीतिचना
मच॥ सामांसमादिशादेवीसर्वतᳶ परिरक्षतुसर्वतᳶ परिरक्षत्वोन्नमः॥ तामग्निवर्णां
तपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेन
मः॥ दुर्गादुर्गेषुस्थानेषुशंनोदेवीरभिष्टये॥ यऽइमंदुर्गास्तवंपुण्यंरात्रौरात्रौसदाप
ठेत्॥ रात्रिᳵ कुशिकस्सौभरोरात्रिस्तवोगायत्री॥ रात्रीसूक्तंजपेन्नित्यंतत्कालऽउपपद्य
ते॥ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषेम॥ मह्यंनमंतांप्रदिशश्चतस्रस्त्वया
ध्यक्षेणपृतनाजयेम॥ ममदेवाविहवेसंतुसर्वऽइंद्रवंतोमरुतोविष्णुरग्निः॥ ममांतरिक्ष
मुरुलोकमस्तुमह्यंवातᳶ पवतांकामेऽअस्मिन्॥ मयिदेवाद्रविणमायजंतांमय्याशीर
स्तुमयिदेवहूतिः॥ दैव्याहोतारोवनुषंतपूर्वेरिष्टा˅[illegible]मतन्वासुवीराः॥ मह्यंयजंतुमम

स्या

मयानिहव्याकूतिस्सत्यामनसोमेऽअस्तु॥ एनोमानिगांकतमच्चनाहंविश्वेदेवासोऽअधिवो
चतानः॥ देवीष्षळुर्वीरुरुनᳵकृणोतविश्वेदेवासऽइहवीरयध्वं॥ माहास्महिप्रजयामात
नूभिर्मारधामद्विषतेसोमराजन्॥ २५॥ अग्नेमन्युंप्रतिनुदन्परेषामदब्धोगोपाᳶपरि
पाहिनस्त्वं॥ प्रत्यंचोयंतुनिगुतᳶपुनस्ते३मैषांचित्तंप्रबुधांविनेशत्॥ धाताधातॄणांभुव
नस्यस्पतिर्देवंत्रातारमभिमातिषाहं॥ इमंयज्ञमश्विनोभाबृहस्पतिर्देवाᳶपांतुयजमा
नंन्यर्षात्॥ उरुव्यचानोमहिषश्शर्म्मयंसदस्मिन्हवेपुरुहूतᳶपुरुक्षुः॥ सनᳶप्रजा
यैहर्यश्वमृळयेंद्रमानोरीरिषोमापरादाः॥ येनःसपत्नाऽअपतेभवंत्विंद्राग्निभ्यामव
बाधामहेतान्॥ वसवोरुद्राऽआदित्याऽउपरिस्पृशंमोग्रंचेत्तारमधिराजमक्रन्॥ खि
ल॥ अर्वांचमिंद्रममुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः॥ इमंनोयज्ञंविहवेजुषस्व

सकुत्स्नोहरिवोमेदिनंत्वा॥१८॥आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं॥इदंहिरण्यंवर्चस्वजै
त्रायाविशतादिमां॥उच्चैर्वाजिपृतनाषाट्सभासाहंधनंजयं॥सर्वास्समग्राऽऋद्धयोहि
रण्येस्मिन्त्समाहिताः॥शुनमहंहिरण्यस्यपितुर्नामेवजग्रभ॥तेनमांसूर्यत्वचमकरंपुरु
षुप्रियं॥सम्राजंचविराजंचाभिष्टिर्याचमेध्रुवा॥लक्ष्मीराष्ट्रस्ययामुखेतयामामिंद्र
संसृज॥अग्नेःप्रजातंपरियद्धिरण्यममृतंदध्रेऽअधिमर्त्येषु॥यऽएनद्वेदसऽइदेनु
मर्हतिजरामृत्युर्भवतियोबिभर्त्ति॥२॥यद्वेदराजावरुणोयदुदेवीसरस्वती॥इन्द्रोयद्वृत्र
हावेदतन्मेवर्चसऽआयुषे॥नतद्रक्षांसिनपिशाचास्तरंतिदेवानामोजःप्रथमजंह्यं३
तत्॥योबिभर्त्तिदाक्षायणाहिरण्यंसदेवेषुकृणुतेदीर्घमायुस्समनुष्येषुकृणुते
दीर्घमायुः॥यदाबध्नंदाक्षायणाहिरण्यंशतानीकानिसुमनस्समाना॥तन्मऽआब

॥सं॰अ॰॥
१०॥

भामिश्रुतन्नूर्णरहायायुष्मान्जरदष्टिर्यथासत्॥ घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं ध
रुणं धारयिष्णु॥ [illegible]र्णक्सपत्नानधरांश्च कृण्वन्नारोह मां महते सौभगाय॥ प्रियं मा कुरु
देवेषु प्रियं राजसु मा कुरु॥ प्रियं विश्वेषु गोत्रेषु मयि धेहि रुचा रुचं॥ अग्निर्येन विराज
ति सूर्यो येन विराजति॥ विराज्येन विराजति तेनास्मान्ब्रह्मणस्पते विराजसमिधं कुरु॥
२१ अनुवाकः॥ नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्॥ किमाव
रीवᳵ कुह कस्य शर्मन्नंभᳵ किमासीद्गहनं गभीरं॥ न मृत्युरासीदमृतं न तर्हि न रात्र्याऽ
अह्नऽ आसीत्प्रकेतः॥ आनीदवातं स्वधया तदेकं तस्माद्धान्यंन परᳵ किंचनास॥ तमऽआ
सीत्तमसा गूळ्हमग्रे प्रकेतं सलिलं सर्वमाऽइदं॥ तु छ्येनाभ्वपिहितं यदासीत्तपसस्त
न्महिनाजायतैकं॥ कामस्तदग्रे समवर्त्तताधि मनसो रेतᳶ प्रथमं यदासीत्॥ सतो

ऋ॰ २
॥राम॥
॥१०॥

बंधुमसतिनिरविंदन्हृदिप्रतीष्याकवयोमनीषा॥ तिरश्चीनोविततोरश्मिरेषामधस्वि
दासी३दुपरिस्विदासी३त्॥ रेतोधाऽआसन्महिमानःऽआसन्स्वधाऽअवस्तात्प्रयति
ᳶ परस्तात्॥ कोऽअद्धावेदकऽइहप्रवोचत्कुतऽआजाकुँतोतऽइयंविसृष्टिः॥ अर्वाग्देवा
ऽअस्यविसर्जनेनाथाकोवेदयतऽआबभूव॥ इयंविसृष्टिर्यतऽआबभूवयदिवादधेय
दिवान॥ योऽअस्याध्यक्षःᳶ परमेव्योमन्त्सोऽअंगवेदयदिवानवेद॥ १७॥ योयज्ञोवि
श्वतस्तंतुभिस्ततऽएकशतंदेवकर्मेभिरायतः॥ इमेवयंतिपितरोयऽआययुᳶ प्रवयापव
येत्यासतेतते॥ पुमाँऽएनंतनुतऽउत्कृणत्तिपुमान्वितत्नेऽअधिनाकेऽअस्मिन्॥ इमे
मयूखाऽउपसेदुरूसदःसामानिचक्रुस्तसराण्योतवे॥ कासीत्प्रमाप्रतिमाकिंनिदान
माज्यंकिमासीत्परिधिᳶ कआसीत्॥ छंदःᳶ किमासीत्प्रऽउगंकिमुक्थंयद्देवादेवम

सं॰अ॰ यजंत विश्वे ॥ अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव ॥ अनुष्टुभा सोम ऽ उक्थैर्मह
७१॥ स्वान्बृहस्पतेर्बृहती वाचमावत् ॥ विराण्मित्रावरुणयोरभिश्रीरिंद्रस्य त्रिष्टुबिह
भागो ऽ अह्नः ॥ विश्वान्देवाञ्जगत्याविवेश तेन चाक्लृप्र ऽ ऋषयो मनुष्याः ॥ चाक्लृ
प्रे तेन ऽ ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ॥ पश्यन्मन्ये मनसा तान्य ऽ चक्षसा
इमं यज्ञमयजंत पूर्वे ॥ सहस्तोमास्सहछंदस ऽ आवृतस्सहप्रमा ऽ ऋषयस्सप्त
दैव्याः ॥ पूर्वेषां पंथामनुदृश्य धीरा ऽ अन्वालेभिरे रथ्यो३ न रश्मीन् ॥ १८ ॥ अ
पप्राच ऽ इंद्र विश्वाँ ऽ अमित्रानपापाचो ऽ अभिभूते नुदस्व ॥ अपोदीचो ऽ अप
शूराधराच ऽ उरौ यथा तव शर्मन्मदेम ॥ कुविदंग यवमंतो यवंचिद्यथा दांत्यनुपू राम
र्वं वियूय ॥ इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ नहि स्थूर्यृ ७१

तुथा यातमस्तिनोत श्रवो विविदे संगमेषु॥ गव्यंतऽ इंद्रं सख्याय विप्राऽ अश्वा
यंतो वृषणं वाजयंतः॥ युवं सुराममश्विना नमुचावासुरे सचा॥ विपिपाना शु
भस्पतीऽ इंद्रं कर्मस्वावतं॥ पुत्रमिव पितरावश्विनोभेंद्रावथुᳵ काव्यैर्दंसनाभिः॥
यत्सुरामं व्यपिबश्शचीभिः सरस्वती त्वा मघवन्नभिष्णक्॥ इंद्रस्सुत्रामा स्ववाँऽ अ
वोभिस्सुमृळीको भवतु विश्ववेदाः॥ बाधतां द्वेषोऽ अभयं कृणोतु सुवीर्यस्य पतय
स्स्याम॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम॥ स सुत्रामा स्ववाँऽ इंद्रो
ऽ अस्मेऽ आराच्चिद्द्वेषस्सनुतर्युयोतु॥ १०॥ ईजानमिद्द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभू
षणि॥ ईजानं देवावश्विनावभि सुम्नैरवर्धतां॥ तावां मित्रावरुणा धारयत्क्षिती सुषुम्ने
षितत्वता यजामसि॥ युवोᳵ क्राणाय सख्यैरभि ष्याम रक्षसः॥ अधा चिन्नु यद्दिधिषा

महेवामभिप्रियंरेक्णᳶपत्यमानाः॥ददूँवायत्पुष्यतिरेक्णस्सम्वारन्नकिरस्यमघानि॥ऽ
असावन्योऽअसुरसूयतद्यौस्त्वंविश्वेषांवरुणासिराजा॥मूर्धारथस्यचाकन्नैतावतैनसां
तकध्रुक्॥अस्मिन्त्स्वेतच्छकपूतऽएनोहितेमित्रेनिगत्तान्हन्तिवीरान्॥अवोर्वायद्धा
त्तनूष्ववᳶप्रियासुयज्ञियास्वर्वा॥युवोर्हिमातादितिर्विचेतसाद्यौर्नभूमिᳶपयसापुपूत
नि॥अवप्रियादिदिष्टनसूरोनिनिक्तरश्मिभिः॥युवंह्यप्नराजावसीदतंतिष्ठद्रथंनधू
र्षदंवनर्षदं॥तानᳶकणूकयन्तीर्नृमेधस्तत्रेऽअंहसस्सुमेधस्तत्रेऽअंहसः॥२०॥प्रोष्व
स्मैपुरोरथमिन्द्रायशूषमर्चत॥अभीकेचिदुलोककृत्संगेसमत्सुवृत्रहास्माकंबोधिचो
दितानभन्तामन्यकेषांज्याकाऽअधिधन्वसु॥त्वंसिंधूँरवासृजोऽधराचोऽअहन्नहिं॥
अशत्रुरिन्द्रजज्ञिषेविश्वंपुष्यसिवार्यंतंत्वापरिष्वजामहेनभन्तां॰॥विषुविश्वाऽअरात

पीर्योनशंतनोधियः॥ अस्तासिशत्रवेवधंयोनऽइंद्रजिघांसतियातेरातिर्ददिर्वसुनभं०॥यो
नऽइंद्राभितोजनोवृकायुरादिदेशति॥ अधस्पदंतमींकृधिविबाधोऽअसिसासहिर्नभंता०
॥योनऽइंद्राभिदासतिसनाभिर्यश्चनिष्ट्यः॥ अवतस्यबलंतिरमहीवद्यौरधत्मनानभंता०
॥वयमिंद्रत्वायवस्सखित्वमारभामहे॥ ऋतस्यनःपथानयातिविश्वानिदुरितानभंता०॥
अस्मभ्यंसुत्वमिंद्रतांशिक्षयादोहतेप्रतिवरंजरित्रे॥ अच्छिद्रोध्नीपीपयद्ययानस्सहस्रधा
रापयसामहीगौः॥२१॥ उभेयदिंद्ररोदसीऽआपप्राथोषाऽइव॥ महांतंत्वामहीनांसम्राजं
चर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥ अवस्मदुर्हणायतोमर्त्तस्यतनुहि
स्थिरं॥ अधस्पदंतमींकृधियोऽअस्माँऽआदिदेशतिदेवी०॥ अवत्याबृहतीरिषोविश्वश्चं
द्राऽअमित्रहन्॥ शचीभिश्शक्र धूनुहींद्रविश्वाभिरूतिभिर्देवीजनित्र्य०॥ अवयत्त्वंशत

सं·अ·
७३

क्रतविंद्र विश्वानिधूनुषे॥ रयिंनसुन्वतेसचा᳚सहस्रिणीभिरूतिभिर्देवी०॥ अवस्वेदाऽइ
वाभितोविष्वक्पतंतुदिद्यवः॥ दूर्वायाऽइवतंतवोव्य१स्मदेतुदुर्मतिर्देवी०॥ दीर्घंह्यंकुशं
यथाशक्तिंबिभर्षिमंतुमः॥ पूर्वेणमघवन्पदाजोवयांयथायमोदेवी०॥ नकिर्देवामि
नीमसिनकिरायोपयामसिमंत्रश्रुत्यंचरामसि॥ पक्षेभिरपिकक्षेभिरत्राभिसंरभामहे॥
२२॥ यस्मिन्वृक्षेसुपलाशेदेवैःसंपिबतेयमः॥ अत्रानोविश्पतिः पितापुराणाँऽ अनुवेन
ति॥ पुराणाँऽ अनुवेनंतंचरंतंपापयामुया॥ असूयन्नभ्यचाकशंतस्माऽअस्पृहयंपुनः॥
यंकुमारनवंरथमचक्रंमनसाकृणोः॥ एकेषंविश्वतः प्रांचमपश्यन्नधितिष्ठसि॥ यंकु
मारप्रावर्त्तयोरथंविप्रेभ्यस्परि॥ तंसामानुप्रावर्त्ततसमितोनाव्याहितं॥ कः कुमारमज
नयद्रथंकोनिरवर्त्तयत्॥ कस्वित्तदद्यनोब्रूयादनुदेयीयथाभवत्॥ यथाभवदनुदेयी

राम
७३

ततोऽअग्रमजायत॥ पुरस्ताद्बुध्नऽआततᳲ पश्चान्निरयणं कृतं॥ इदं यमस्य सादनं देवमा
नंयदुच्यते॥ इयमस्य धम्यंतेना ळीरयंगीर्भिᳲ परिष्कृतः॥२३॥ केश्य१ग्निंकेशी वि
षंकेशी बिभर्त्ति रोदसी॥ केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते॥ मुनयो वातरशनाᳲ पिशं
गावसतेमला॥ वातस्यानुध्राजिंयंति यद्देवासोऽअविक्षत॥ उन्मदितामौनेयेन वातांऽआ
तस्थिमावयं॥ शरीरेदस्माकंयूयंमर्त्तासोअभिपश्यथ॥ अंतरिक्षेणपतति विश्वारूपा
वचाकशत्॥ मुनिर्देवस्यदेवस्य सौकृत्याय सखाहितः॥ वातस्याश्वोवायोस्सखाथोदेवेषि
तोमुनिः॥ उभौसमुद्रावाक्षैति यश्चपूर्वऽउतापरः॥ अप्सरसांगंधर्वाणांमृगाणांचरणे
चरन्॥ केशीकेतस्य विद्वान्त्सखास्वादुर्मदिन्तमः॥ वायुरस्माऽउपामंथत्पिनष्टिस्माकु
नन्नमा॥ केशीविषस्यपात्रेणयद्रुद्रेणापिबत्सह॥२४॥ उतदेवाऽअवहितंदेवाऽउन्न

यथा पुनः॥ उतागश्चक्रुषं देवा देवा जीवयथा पुनः॥ द्वाविमौ वातौ वात ऽ आ सिंधोरा
परावतः॥ दक्षं ते ऽ अन्य ऽ आ वातु परान्यो वातु यद्रपः॥ आ वात वाहि भेषजं वि वात वा
हि यद्रपः॥ त्वं हि विश्वभेषजो देवानां दूत ऽ ईयसे॥ आ त्वागमं शंतातिभिरथो ऽ अरिष्टता
तिभिः॥ दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते॥ त्रायंतामिह देवास्त्रायतां मरुतां गणः
॥ त्रायंतां विश्वा भूतानि यथायमरपा ऽ असत्॥ आप ऽ इद्वा ऽ उ भेषजीरापो ऽ अमीवचा
तनीः॥ आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः
पुरोगवी॥ अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि॥२५॥ तव त्य ऽ इंद्र सख्येषु वह्नय
ऽ ऋतं मन्वाना व्यदर्दिरुर्वलं॥ यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दं
सयः॥ अवासृजः प्रस्वः श्वंचयो गिरीनुदाज ऽ उस्रा ऽ अपिबो मधु प्रियं॥ अवर्धयो

वनिनोऽअस्यदंससाशुशोचसूर्यऽऋतजातयागिरा॥ विसूर्योमध्येऽअमुचद्रथंदि
वोविदद्दासायप्रतिमानमार्यः॥ दृह्लानिपिप्रोरसुरस्यमायिनऽइंद्रोव्यास्यच्चकृवांऽऋ
जिश्वना॥ अनाधृष्टानिधृषितोव्यास्यन्निधीँरदेवाँऽअमृणदयास्यः॥ मासेवसूर्योवसु
पुर्यमाददेगृणानःशत्रूँरशृणाद्विरुक्मता॥ अयुद्धसेनोविभ्वाविभिंदतादाशद्वृत्रहा
तुज्यानितेजते॥ इंद्रस्यवज्रादबिभेदभिश्नथःप्राक्रामच्छुंध्यूरजहादुषाऽअनः॥
एतात्यातेश्रुत्यानिकेवलायदेकऽएकमकृणोरयज्ञं॥ मासांविधानमदधाऽअधिद्यवि
त्वयाविभिन्नंभरतिप्रधिंपिता॥ २६॥ सूर्यरश्मिर्हरिकेशःपुरस्तात्सवितान्योतिरुद
याँऽअजस्रं॥ तस्यपूषाप्रसवेयातिविद्वान्त्संपश्यन्विश्वाभुवनानिगोपाः॥ नृचक्षा
ऽएषदिवोमध्यऽआस्तऽआपप्रिवान्रोदसीऽअंतरिक्षं॥ सविश्वाचीरभिचष्टेघृताची

स॰ अ॰
७५

रंतरा पूर्वमपरंच केतुं॥ रायो बुध्नस्संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः॥ देवऽइव सवि
ता सत्यधर्मेंद्रो न तस्थौ समरे धनानां॥ विश्वावसुं सोम गंधर्वमापो ददृशुषीस्तदृतेना व्यायन्॥
तदन्ववैदिंद्रो रारहाणऽआसां परि सूर्यस्य परिधींरपश्यत्॥ विश्वावसुरभि तन्नो गृणातु दि
व्योगंधर्वो रजसो विमानः॥ यद्वाघा सत्यमुत यन्न विद्म धियो हिन्वानो धियऽइन्नोऽअव्याः
॥ सस्निमविंदच्चरणे नदीनामपावृणोद्दुरोऽअश्मव्रजानां प्रासां गंधर्वोऽअमृतानि वोचदिं
द्रो दक्षं परि जानादहीनां॥ २७॥ अग्ने तव श्रवो वयो महि भ्राजंतेऽअर्चयो विभावसो॥ बृहद्भा
नो शवसा वाजमुक्थ्यं१ दधासि दाशुषे कवे॥ पावकवर्चाः शुक्रवर्चाऽअनूनवर्चाऽउदि
यर्षि भानुना॥ पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसीऽउभे॥ ऊर्जो नपाज्जातवेद
सुशस्तिभिर्मंदस्व धीतिभिर्हितः॥ त्वेऽइषस्सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः॥ इ

राम
७५

ङ्ज्यन्नग्ने प्रथयस्व जंतुभिरस्मे रायोऽ अमर्त्य॥ स दर्शतस्य वपुषो विराजसि पृणक्षि
सानसिं क्रतुं॥ दृष्कर्तारमध्वरस्य प्रचेतसं क्षयंतं राधसो महः॥ रातिं वामस्य सुभगां म
हीमिषं दधासि सानसिं रयिं॥ ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः
॥ श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥ २८॥ अग्नेऽ अच्छा वदेह नᳵ प्रत्यन्नः सु
मना भव॥ प्रनोयच्छ विशांपते धनदाऽ असि नस्त्वं॥ प्रनोयच्छत्वर्यमा प्रभग ᳵ प्रबृहस्प
तिः॥ प्रदेवाᳵ प्रोत सूनृता रायो देवी ददातु नः॥ सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे॥ आ
दित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिं॥ इंद्रवायू बृहस्पतिं सुहवेह हवामहे॥ यथा नस्स
र्वऽइज्जनस्संगत्यां सुमनाऽ असत्॥ अर्यमणं बृहस्पतिमिंद्रं दानाय चोदय॥ वातं विष्णुं स
रस्वतीं सवितारं च वाजिनं॥ त्वंनोऽ अग्नेऽ अग्निभिर्ब्रह्म यज्ञं च वर्धय॥ त्वंनो देवतातये

एयोदानोयचोदय ॥ २२ ॥ अयमग्नेजरिता त्वेऽअभूदपि सहसस्सूनोनह्यन्यदस्त्याप्यं
॥ भद्रंहिशर्मत्रिवरूथमस्तित आरेहिंसानामपदिद्युमाकृधि ॥ प्रवत्तेऽअग्नेजनिमापि
तूयतस्साचीवविश्वाभुवनान्यृंजसे ॥ प्रसप्तयः प्रसनिषंतनोधियः पुरश्चरंतिपशुपा
ऽइवत्मना ॥ उतवाऽउपरिवृणक्षिबप्सद्बहोरग्नेऽउलपस्यस्वधावः ॥ उतखिल्याऽउर्वरा
णांभवंतिमातेहेतिंतविषींचुक्रुधाम ॥ यदुद्वतोनिवतोयासिबप्सत्पृथगेषिप्रगर्धिनी
वसेना ॥ यदातेवातोऽअनुवातिशोचिर्वप्तेवश्मश्रुवपसिप्रभूम ॥ प्रत्यस्यश्रेणयोददृ
श्रऽएकंनियानंबहवोरथासः ॥ बाहूयदग्नेऽअनुमर्मृजानोन्यङ्ङुत्तानामन्वेषिभूमिं ॥ उ
त्तेशुष्माजिहतामुत्तेऽअर्चिरुत्तेऽअग्नेशशमानस्यवाजाः ॥ उच्छ्वंचस्वनिनमवर्धमानऽ
आत्वाद्यविश्वेवसवस्सदंतु ॥ अपामिदंन्ययनंसमुद्रस्यनिवेशनं ॥ अन्यंकृणुष्वेतः पंथां

री २

तेनेयाहिवन्नूणाँ अनु॥ आयेनेतेपुंस्यपेणोदूर्वीरोहंतुपुष्पिणीः॥ हृदाश्चपुंडरीकाणिसमुद्र
स्यगृहाइमे॥ ३०॥ हिमस्येत्वाजरायुणाशालेपरिव्ययामसि॥ उनेहृदोहिनोमुवोग्निर्ददातु
भेषजं॥ शीतहृदोहिनोमुवोग्निर्ददातुभेषजं॥ अंतिकामग्निमजनद्दूर्वादशिरस्तुलागमतु॥
अजातपुत्रपक्षायाहृदयंममहूयते॥ विपुलंवनंबह्वाकाशंचरज्जातवेदःकामाय॥ मांश्च
रक्षपुत्रांश्चशरणमभूत्तव॥ पिंगाक्षलोहितग्रीवकृष्णवर्णनमोस्तुते॥ अस्मान्निबर्हरस्ये
नींस्वाल्स्सोर्भूयोर्य्यया॥ इंद्रक्षत्रंददातुवरुणामभिषिंचतु॥ शत्रवोनिधनंयांतजयत्वंब्र
ह्मतेजसा॥ कपिलजटीसर्वभक्षंचाग्निंप्रसक्षदैवतं॥ वरुणंचमन्नांद्यग्नेममपुत्रांस्तु
रक्षसोन्नमः॥ सामंवर्षशतंजीवपिबखादस्वमोदस्व॥ दुःखितांनरीजांश्चैवप्रजांचपशु
पालय॥ यावदादित्यस्तपतियावद्भ्राजतिचंद्रमाः॥ यावद्वातःप्रवायतितावज्जीवजय॥

६२

सं॰अ॰
११

नय॥ येनकेनप्रकारेणकोविनोमनुजीवेति॥ परेषामुपकारार्थंयज्जीवतिसजीवति॥
एतांवैश्वानरंसर्वविनमोस्कृते॥ खिल॥ऽइतिअष्टमीष्टकेसप्तमोध्यायः॥७॥ऽॐत्यं
चिदत्रिमृतजुरमर्थमश्वंनयातवे॥ कक्षीवंतंयदीपुनारथंनकृणुथोनवं॥ त्यंचिदश्वंन
वाजिनमरेणवोयमत्नत॥ दृळ्हंग्रंथिंनविष्यतमत्रिंयविष्ठमारजः॥ नरादंसिष्ठावत्रये
शुभ्रासिषासतंधियः॥ अथाहिवांदिवोनरापुनस्तोमोनविशसे॥ चितेतद्वांसुराधसारा
सुमति तिःरश्विना॥ आयन्नःसदनेपृथौसमनेपर्षथोनरा॥ युवंभुज्युंसमुद्रऽआरजसःपारऽइं
खितं॥ यातमच्छापतत्रिभिर्नासत्यासातयेकृतं॥ आवांसुम्नैःशंयूऽइवमंहिष्ठाविश्ववेद
सा॥ समस्मेभूषतंनरोत्संनपिप्युषीरिषः॥२॥ अयंहितेऽअमर्त्यऽइंदुरत्योनपत्यते॥
दक्षोविश्वायुर्वेधसे॥ अयमस्मासुकाव्यऽऋभुर्वज्रोदास्वते॥ अयंबिभर्त्यूर्ध्वकृशानं

२

एम
११

मदंमृभुर्नकृत्व्यंमदं॥ घृषुश्श्येनायकृत्वँऽआसुस्वासुवंसगः॥ अवदीधेदहीशुवः॥ यं
सुपर्णᳲपरावतश्श्येनस्यपुत्रऽआभरत्॥ शतचक्रंयो३ह्योवर्त्तनिः॥ यंतेश्येनश्चारुम
वृकंपदाभरदरुणंमानमंधसः॥ एनावयोवितार्यायुर्जीवसऽएनाजागारबंधुता॥ एवात
दिंद्रऽइंदुनादेवेषुचिद्धारयातेमहित्यजः॥ क्रत्वावयोवितार्यायुस्सुक्रतोँ[illegible]त्वायमस्मदासु क्र
तः॥२॥ इमांखनाम्योषधिंवीरुधंबलवत्तमां॥ ययासपत्नींबाधतेययासंविंदतेपतिं॥ उ
त्तानपर्णेसुभगेदेवजूतेसहस्वति॥ सपत्नींमेपराधमपतिंमेकेवलंकुरु॥ उत्तराहमु
त्तरऽउत्तरेदुत्तराभ्यः॥ अथासपत्नीममाधरासाधराभ्यः॥ नह्यस्यानामगृभ्णामिनोऽ
अस्मिन्रमतेजने॥ परामेवपरावतंसपत्नींगमयामसि॥ अहमस्मिसहमानाथत्व
मसिसासहिः॥ उभेसहस्वतीभूत्वीसपत्नींमेसहावहै॥ उपतेधांसहमानामभित्वाधांस

पा.३

हीयसा॥ मामनु प्रते मनो वत्सं गौरिव धावतु पथा वारिव धावतु॥६॥ अरण्यान्यरण्यान्य
सौ या प्रेव नश्यसि॥ कथा ग्रामं न पृच्छसि न त्वा भीरिव विंदती३॥ वृषारवाय वदते यदुपा
वति चिच्चिकः॥ आघाटिभिरिव धावयन्नरण्यानिर्महीयते॥ उत गावऽइवादंत्युत वेश्मेव दृ
श्यते॥ उतोऽअरण्यानिस्सायं शकटीरिव सर्जति॥ गामंगैषऽआ ह्वयति दार्वंगैषोऽअपा
वधीत्॥ वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते॥ न वाऽअरण्यानिर्हंत्यन्यश्चेन्नाभिग
च्छति॥ स्वादोᳶ फलस्य जग्ध्वाये यथाकामं नि पद्यते॥ आंजनगंधिं सुरभिं बह्वन्नामकृषी
वलां॥ प्राहं मृगाणां मातरमरण्यानिमशंसिषं॥६॥ श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं
नर्यं विवेरपः॥ उभे यत्त्वा भवतो रोदसीऽअनुरेजते शुष्मात्पृथिवी चिदद्रिवः॥ त्वं माया
भिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः॥ त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वा

सुहव्यास्विष्टिषु॥ ऐषुचाकंधिपुरुहूतसूरिषुवृधासोयेमघवन्नानशुर्मघं॥ अर्चंतितो
केतनयेपरिष्टिषुमेधसातावाजिनमह्रयेधने॥ सऽइन्नुरायस्सुभृतस्यचाकनन्मदंयो
ऽअस्यरंह्यंचिकेतति॥ त्वावृधोमघवन्दाश्वध्वरोमक्षूसवाजंभरतेधनानृभिः॥ त्वंश
र्धायमहिनागृणानऽउरुकृधिमघवञ्छग्धिरायः॥ त्वंनोमित्रोवरुणोनमायीपित्वोन
दस्मदयसेविभक्ता॥५॥ सुष्वाणासऽइंद्रस्तुमसित्वाससवांसश्चतुविनृम्णवाजं॥ आनो
भरसुवितंयस्यचाकन्त्मनातनासनुयामत्वोताः॥ ६ सषस्त्वमिंद्रसूरजातोदासीर्विशःसू
र्येणसह्याः॥ गुहाहितंगुह्यंगूळ्हमप्सुबिभृमसिप्रस्रवणेनसोमं॥ अर्योवागिरोऽअभ्य
र्चविद्वानृषीणांविप्रस्सुमतिंचकानः॥ तेस्यामयेरणयंतसोमैरेनोततुभ्यंरथोळ्हभ
क्षैः॥ इमाब्रह्मेंद्रतुभ्यंशंसिदानृभ्योनृणांशूरशवः॥ तेभिर्भवसक्रतुर्येषुचाकन्नुतत्राय

सं·अ०
७१

त्वा
स्वगृणन्त ऽउत[illegible]नु॥ श्रुधीहवमिंद्रशूरपृथ्व्याऽउतस्तवसेवेन्यस्यार्कैः॥आयस्तेयोनिंघृतवं
तमस्वारू र्मिर्ननिम्नैर्द्रवयंतवक्काः॥ ५ ॥सवितायंत्रैः पृथिवीमरम्णादस्कंभनेसविताद्या
मदंहत्॥ अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्तेबद्धंसवितासमुद्रं॥यत्रासमुद्रस्कभितोव्यौ
नदपांनपात्सवितातस्यवेद॥अतोभूरतऽआऽउत्थितंरजोतोद्यावापृथिवीऽअप्रथेतां॥प
श्चेदमन्यदभवद्यजत्रममर्त्यस्यभुवनस्यभूना॥सुपर्णोऽअंगसवितुर्गरुत्मान्पूर्वोजा
तस्सऽउऽअस्यानुधर्म॥गावऽइवग्रामंयूयुधिरिवाश्वान्वाश्रेववत्सं सुमनादुहाना॥प
तिरिवजायामभिनोन्येतुधर्त्तादिवः सविताविश्ववारः॥हिरण्यस्तूपस्सवितर्यथात्वांगिर
सोजुह्वेवाजेऽअस्मिन्॥एवात्वार्चन्नवसेवंदमानस्सोमस्येवांशुंप्रतिजागराहं॥ ७ ॥स
मिद्धश्चित्समिध्यसेदेवेभ्योहव्यवाहन॥आदित्यैरुद्रैर्वसुभिर्नऽआगहिमृळीकायनऽ

राम
७१॥

आगहि॥ इमंयज्ञमिदंवचोजुजुषाणऽउपागहि॥ मर्त्तासस्त्वासमिधानहवामहेमृळीका
यहवामहे॥ त्वासुजातवेदसंविश्ववारंगृणेधिया॥ अग्नेदेवाँऽआवहनः प्रियव्रतान्मृ
ळीकायप्रियव्रतान्॥ अग्निर्देवोदेवानामभवत्पुरोहितोग्निंमनुष्याऽऋषयस्समीधि
रे॥ अग्निंमहोधनसातावहंहुवेमृळीकंधनसातये॥ अग्निरत्रिंभरद्वाजंगविष्ठिरंप्रावन्न
ः कण्वंत्रसदस्युमाहवे॥ अग्निंवसिष्ठोहवतेपुरोहितोमृळीकायपुरोहितः॥ ~॥ श्रद्धया
ग्निस्समिध्यतेश्रद्धयाहूयतेहविः॥ श्रद्धांभगस्यमूर्धनिवचसावेदयामसि॥ प्रियंश्रद्धे
ददतः प्रियंश्रद्धेदिदासतः॥ प्रियंभोजेषुयज्वस्विदंमऽउदितंकृधि॥ यथादेवाऽअसु
रेषुश्रद्धामुग्रेषुचक्रिरे॥ एवंभोजेषुयज्वस्वस्माकमुदितंकृधि॥ श्रद्धांदेवायजमाना
वायुगोपाऽउपासते॥ श्रद्धांहृदय्य१याकूत्याश्रद्धयाविंदतेवसु॥ श्रद्धांप्रातर्हवामहेश्र

॥सं॰ अ॰॥
॥८०॥

हूंमध्यंदिनंपरि॥ श्रद्धांसूर्यस्यनिम्रुचि श्रद्धे श्रद्धापयेहनः॥१॥ मेधामह्यमंगिरसोमेधां
सप्तऽ ऋषयोददुः॥ मेधामिंद्रश्चाग्निश्चमेधां धातादधातुमे॥ मेधांतेवरुणोराजामेधां
देवीसरस्वती॥ मेधांतेऽ अश्विनौदेवावाधत्तांपुष्करस्रजा॥ यामेधाऽ अप्सरसोगंधर्वेषु
चयन्मनः॥ दैवीयामानुषीमेधासामामाविशतादिमां॥ यन्मेनोक्तंतद्रमतांशकेयंयम
नुद्रवे॥ निशामितंनिशामहैमहिव्रतंसहप्रियेणभूयासंब्रह्मणासंगमेमहि॥ शरीरंमे
विचक्षणवाङ्मेमधुमद्दुहा॥ अवदूमहमसौसूर्योब्रह्मणःआणीस्थश्रुतंमेमाप्र
हासी॥ मेधांदेवींमनसारेजमानांगंधर्वजुष्टांप्रतिनोजुषस्व॥ मह्यंमेधांवदमेधावि
भूयासमजराजरिष्णुः॥ सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं॥ सनिंमेधामयासिषं॥
यांमेधांदेवगणाः पितरश्चोपऽ आसते॥ तयामामद्यमेधयाग्नेमेधाविनंकुरु॥ मेधा

मह्यंश्रियंवद ३

॥एम॰
॥ ८०॥

ष्णु

स्य१हं सुमनास्सुप्रतीकश्श्ण ह्वा मनास्स्ससमुपस्सुह्रोवः॥ महायशा धारयिस्सुः॰ प्रबिंकाभूया
समस्येस्व धया प्रयोगे॥ऽ अनुवाक१ ॥ शास ऽ इत्थामहाँ ऽ अस्यमित्रखादो ऽ अद्भुतः॥ नयस्य
हन्यते सखा न जीयते कदा चन॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेंद्रः॰ पुरऽ
एतु नस्सोमपा ऽ अभयंकरः॥ विरक्षो विमृधो जहि वि वृत्रस्य हनू रुज॥ वि मन्युमिंद्र वृत्रह
न्नमित्रस्याभिदासतः॥ विन ऽ इंद्र मृधो जहि नीचा यच्छ पृतन्यतः॥ यो ऽ अस्माँ ऽ अभिदास
त्यधरंगमया तमः॥ अपेंद्र द्विषतो मनोप जिज्यासतो वधं॥ वि मन्योश्शर्म यच्छ वरीयो
यवया वधं॥ १ ॥ ईंखयंतीरपस्युव ऽ इंद्रं जातमुपासते॥ भेजानासस्सुवीर्यं॥ त्वमिंद्र बला
दधि सहसो जात ऽ ओजसः॥ त्वं वृषन्वृषेदसि॥ त्वमिंद्रासि वृत्रहा व्यं१तरिक्षमतिरः॥ उ
द्यामस्तभ्ना ऽ ओजसा॥ त्वमिंद्र सजोषसमर्कं बिभर्षि बाह्वोः॥ वज्रं शिशान ऽ ओजसा॥

सं॰अ॰
८१

त्वमिंद्राभिभूरसिविश्वाजातान्योजसा॥ सविश्वाभुवऽआभवः॥२१॥ सोमऽएकेभ्यः॰प
वतेघृतमेकऽउपासते॥ येभ्योमधुप्रधावतितांश्चिदेवापिगच्छतात्॥ तपसायेऽअना
धृष्यास्तपसायेस्वर्ययुः॥ तपोयेचक्रिरेमहस्तांश्चि॰॥ येयुध्यंतेप्रधनेषुशूरासोयेतनू
त्यजः॥ येवासहस्रदक्षिणास्तांश्चिदेवापि॰॥ येचित्पूर्वऽऋतसापऽऋतावानऽऋतावृधः
॥ पितॄन्तपस्वतोयमतांश्चि॰॥ सहस्रणीथाःकवयोयेगोपायंतिसूर्यं॥ ऋषीन्तपस्वतोय
मतपोजाँऽअपिगच्छतात्॥२२॥ अरायिकाणेविकटेगिरिंगच्छसदान्वे॥ शिरिंबिठस्यस
त्वभिंष्ट्वाचातयामसि॥ चत्तोऽइतश्चत्तामुतःसर्वाभ्रूणान्यारुषी॥ अराय्यंब्रह्मणस्पतेती
क्ष्णशृंगोदृषन्निहि॥ अदोयद्दारुप्लवतेसिंधोः॰पारेअपूरुषं॥ तदारभस्वदुर्हणोतेनग
च्छपरस्तरं॥ यद्धप्राचीरजगंतोरोमंडूरधाणिकीः॥ हताऽइंद्रस्यशत्रवस्सर्वेबुद्बुद

तो ॥ ३

ऋग॰
८१

यान्नावः॥ परीमे गामनेषत पर्यग्निमहृषत॥ देवेष्वक्रत श्रवः कऽ इमांऽ आ दधर्षति
॥२३॥ अग्निं हिन्वंतु नो धियस्सप्तिमाशुमिवाजिषु॥ तेन जेष्म धनंधनं॥ यया गाऽआ
करामहे सेनयाग्ने तवोत्या॥ तां नो हिन्व मघत्तये॥ आग्ने स्थूरं रयिं भर पृथुं गोमंतमश्वि
नं॥ अंग्धि खं वर्त्तया पणिं॥ अग्ने नक्षत्रमजरऽमा सूर्यं रोहयो दिवि॥ दधज्ज्योतिर्जनेभ्यः
॥ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठऽ उपस्थसत्॥ बोधा स्तोत्रे वयो दधत्॥२४॥ इमा नु कं
भुवना सीषधामेंद्रश्च विश्वे च देवाः॥ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रस्सह चीक्लृपाति
॥ आदित्यैरिंद्रस्सगणो मरुद्भिरस्माकं भूत्ववितातनूनां॥ हत्वाय देवाऽ असुरान्यदायन्दे
वा देवत्वमभिरक्षमाणाः॥ प्रत्यंचमर्कमनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन्॥२५
॥ सूर्यो नो दिवस्पातु वातोऽ अंतरिक्षात्॥ अग्निर्नः पार्थिवेभ्यः॥ जोषा सवितर्यस्य ते ह

रश्शतंसवाँऽअर्हति॥ पाहिनोदिद्युतःपतंत्याः॥ चक्षुर्नोदेवस्सविताचक्षुर्नऽउतपर्व
तः॥ चक्षुर्धातादधातुनः॥ चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्यैतनूभ्यः॥ संचेदंविचपश्येम
॥ सुसंदृशंत्वावयंप्रतिपश्येमसूर्य॥ विपश्येमनृचक्षसः॥ २६॥ उदसौसूर्योऽअगादुद
यंमामकोभगः॥ अहंतद्विद्वलापतिमभ्यसाक्षिविषासहिः॥ अहंकेतुरहंमूर्धाहमु
ग्राविवाचनी॥ ममेदनुक्रतुंपतिस्सेहानायाऽउपाचरेत्॥ ममपुत्राश्शत्रुहणोथोमेदुहि
ताविराट्॥ उताहमस्मिसंजयापत्यौमेश्लोकऽउत्तमः॥ येनेंद्रोहविषाकृत्व्यभवद्द्युम्न्यु
त्तमः॥ इदंतदक्रिदेवाऽअसपत्नाकिलाभुवं॥ असपत्नासपत्नघ्नीजयंत्यभिभूवरी॥
आवृक्षमन्यासांवर्चोराधोऽअस्थेयसामिव॥ समजैषमिमाऽअहंसपत्नीरभिभूवरी
॥ यथाहमस्यवीरस्यविराजानिजनस्यच॥ २७॥ तीव्रस्याभिवयसोऽअस्यपाहिसर्वरथा

विहरीऽइहमुंच॥ इंद्रमा त्वायजमानासोऽ अन्येनिरीरमन्तुभ्यमिमेसुतासः॥ तुभ्यंसुता
स्तुभ्यमुसोत्वासस्त्वांगिरः श्वात्र्याऽआह्वयंति॥ इंद्रेदमद्यसवनंजुषाणोविश्वस्यविद्वाँऽइ
हपाहिसोमं॥ यऽउशतामनसासोममस्मैसर्वहृदादेवकामस्सुनोति॥ नगाऽइंद्रस्त
स्यपराददातिप्रशस्तमिच्चारुमस्मैकृणोति॥ अनुस्पष्टोभवत्येषोऽ अस्ययोऽअस्मै
रेवान्नसुनोतिसोमं॥ निररत्नौमघवातंदधाति ब्रह्मद्विषोहंत्यनानुदिष्टः॥ अश्वायंतो
गव्यंतोवाजयंतोहवामहेत्वोपगंतवाऽउ॥ आभूषंतस्तेसुमतौनवायांवयमिंद्रत्वाशु
नंहुवेम॥ १७॥ मुंचामित्वाहविषाजीवनायकम ज्ञातयक्ष्मादुतराजयक्ष्मात्॥ ग्राहि
र्जग्राहयदिवैतदेनंतस्याऽ इंद्राग्नीप्रमुमुक्तमेनं॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्यो
रंतिकंनीतऽएव॥ तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय॥ सहस्राक्षेण

सं॰अ॰
८३

शतशारदेनशतायुषाहविषाहार्षमेनं॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपा
रं॥ शतंजीवशरदोवर्धमानश्शतंहेमंतान्छतमुवसंतान्॥ शतमिंद्राग्नीसविताबृहस्पति
श्शतायुषाहविषेमंपुनर्दुः॥ आहार्षंत्वाविदंत्वापुनरागाᳶपुनर्नव॥ सर्वांगसर्वंतेच
क्षुस्सर्वमायुश्चतेविदं॥१९॥ ब्रह्मणाग्निस्संविदानोरक्षोहाबाधतामितः॥ अमीवायस्तेग
र्भंदुर्णामायोनिमाशये॥ यस्तेगर्भममीवादुर्णामायोनिमाशये॥ अग्निष्टंब्रह्मणासहनि
ष्क्रव्यादमनीनशत्॥ यस्तेहंतिपतयंतंनिषत्स्नुंयस्सरीसृपं॥ जातंयस्तेजिघांसतितमितो
नाशयामसि॥ यस्तऽऊरूविहरत्यंतरादंपतीशये॥ योनिंयोऽअंतरारेळ्हितमितोनाशया
मसि॥ यस्त्वाभ्रातापतिर्भूत्वाजारोभूत्वानिपद्यते॥ प्रजांयस्तेजिघांसतितमि०॥ यस्त्वास्व
प्नेनतमसामोहयित्वानिपद्यते॥ प्रजांयस्तेजि०॥२०॥ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यां

एम
८३

ज्ञानमिंद्रश्चाग्निश्च संज्ञानंसविताविदत्॥ संज्ञानंनःखेभ्यःसंज्ञानंवरुणेभ्यः॥ संज्ञानमश्वि
नायुवमिहास्मासुनियच्छतां॥ यत्कक्षीवांसंवननंपुत्रोऽअंगिरसाभवेत्॥ तेनूनोद्यवि
श्वेदेवास्तप्रियांसमवीवनां॥ संवोमनोंसिजानतांसमाकूतिर्मनामसि॥ असौयोविमना
जनस्तंसमावर्त्तयामसि॥ तच्छंयोरा०॥ नैर्हस्त्यंसेनारणंपरिवत्मेतुयद्रुविः॥ तेनामि
त्राणांबाहून्हविषाश्लेषयामसि॥ परिवर्त्मान्येषामिंद्रःपूषातुसिस्रतु॥ तेषांवोऽ
अग्निर्दग्धोमामग्निर्मक्लानामिंद्रोहंतुवरंवरं॥ ऐषुनर्यवृषाजिनंहरिणस्याभियंय
था॥ परांअमित्राएमोअन्नकामः॥ प्रजाकामउतकश्यप॥ भूतंभविष्यप्रस्तौतिमहद्ब्र
ह्मैकमक्षरंबहुब्रह्मैकमक्षरं॥ यदक्षरद्भूतकृत्तोविश्वेदेवाऽउपासते॥ महर्षिमस्य
गोप्तारंजमदग्निमकुर्वत॥ जमदग्निराप्यायतेछंदोभिश्चतुरक्षरैः॥ राज्ञासोम

स्यसोमस्यम क्षणाब्रह्मणा वीर्यावतां॥ शिवानःप्रदिशोदिशःसत्यानःप्रदिशोदिशः॥
अजोयज्ञेजोद्दशेससंज्योतिःपरोगुहा॥ तदृषिःकश्यपस्तौतिसत्यंब्रह्म चराचरंध्र
वंब्रह्मचराचरं॥ आयुष्यंजमदग्नेःकश्यपः॥ तच्छंयोरा०॥ ॐनमोब्रह्मणे०मि॥ ॥
इति अष्टमाष्टके अष्टमोध्यायः॥ ८ ॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥
विश्वेश्वर विरूपाक्ष विश्वरूपसदाशिव॥ शरणं भव भूतेश करुणाकर शंक
र॥ हर शंभो महादेव विश्वेशामरवल्लभ॥ शिव शंकर सर्वात्मन्नीलकंठ नमोस्तु
ते॥ अमृतेशाय शर्वाय नीलकंठाय ते नमः॥ ॥ ॥

अथ अष्टमाष्टक समाप्तः॥

```
[OrderDescription]
,CREATED=13.08.20 11:01
,TRANSFERRED=2020/08/13 at 11:17:40
,PAGES=170
,TYPE=STD
,NAME=S0003494
,Book Name=M-3063-ASHTMASTAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
```

```
FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
```

```
FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
```

```
FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
```

```
FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
```

```
FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
```

```
FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
```

```
FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
```

```
FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
```

FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF

```
FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
```

```
FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
```

```
FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
```

```
FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,
```